# वैष्णवागमविमर्शः

कुलपतेः डॉ. मण्डनमिश्रस्य प्रस्तावनया समलङ्कृतः

प्रणेता
आचार्यश्रीव्रजवल्लभद्विवेदः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

[illegible] ત્રિવેદી

M. M. GOPĪNĀTHAKAVIRĀJASMṚTI-GRANTHAMĀLĀ
[Vol. 1]

# VAIṢṆAVĀGAMAVIMARŚA

FOREWORD BY
**DR. MANDAN MISHRA**
VICE-CHANCELLOR

**Written & Edited by**
**ĀCĀRYAŚRĪ VRAJAVALLABHA DVIVEDĪ**
Ex-Head of the Dept. of Sāṅkhyayoga-Tantrāgama
Sampurnanand Sanskrit University
Varanasi

**VARANASI**
**1997**

Research Publication Supervisor—
**Director, Research Institute,**
Sampurnanand Sanskrit University
Varanasi.

❑

Published by—
**Dr. Harish Chandra Mani Tripathi**
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

Available at—
**Sales Department,**
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

**First Edition,** 500 Copies
**Price :** Rs. 100.00

❑

Printed by —
**Tara Printing Works**
Kamachha,
Varanasi—221 010.

म. म. गोपीनाथकविराजस्मृति-ग्रन्थमाला

[ प्रथमं पुष्पम् ]

# वैष्णवागमविमर्शः

कुलपतेः डॉ॰ मण्डनमिश्रस्य प्रस्तावनया समलङ्कृतः

प्रणेता सम्पादकश्च

**आचार्यश्रीव्रजवल्लभद्विवेदः**

सांख्ययोग-तन्त्रागमविभागाध्यक्षचरः

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

वाराणसी

वाराणस्याम्

२०५४तमे वैक्रमाब्दे     १९१९तमे शकाब्दे     १९९७तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः —
**निदेशकः, अनुसन्धानसंस्थानस्य**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी ।

❑

प्रकाशकः —
**डॉ. हरिश्चन्द्रमणित्रिपाठी**
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२

❑

प्राप्तिस्थानम् —
**विक्रय-विभागः**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२

❑

**प्रथमं संस्करणम्,** ५०० प्रतिरूपाणि
**मूल्यम् –** १००.०० रूप्यकाणि

❑

मुद्रकः –
**तारा प्रिंटिंग वर्क्स**
कमच्छा, वाराणसी - २२१ ०१०

# प्रस्तावना

स्वनामधन्या महामहोपाध्यायाः **श्रीगोपीनाथकविराज**महोदया विश्वविद्यालयस्यास्य योगतन्त्रविभागस्य श्रद्धेया आचार्या आसन्। वस्तुतोऽस्य विश्वविद्यालयस्य विश्वस्मिन् जगति येयं प्रतिष्ठा सम्प्रत्यपि विराजतेतमाम्, तस्या अनुपमं श्रेयः श्रीकविराजमहोदयानां वर्तते। ते ह्यस्य विश्वविद्यालयस्य प्राक्तनस्वरूपस्य काशिकराजकीयसंस्कृतमहाविद्यालयस्य प्राचार्याः, विश्वविख्यातस्य तस्य सरस्वतीभवनग्रन्थालयस्य ग्रन्थाध्यक्षाश्चासन्। सरस्वतीभवने सङ्गृहीतानां पाण्डुलिपीनां सम्पादनस्य प्रकाशनस्य च कार्यक्रमस्तेषां नेतृत्वे प्रावर्तत, सोऽयं कार्यक्रमः सम्प्रति प्रतिवर्षं संवर्द्धमानो विश्वविद्यालयस्य गौरवं महिमानं च संवर्द्धयन् आस्ते इति महतो हर्षप्रकर्षस्य विषयः। वस्तुतोऽस्य सर्वस्यापि विद्यावैभवस्य मूले तेषामवदानं स्वर्णाक्षरैः समुल्लेखनीयम्।

एकत्र स्वकीयेन गभीरेण वैदुष्येण, अपरत्र च साधनाया अतिशयेन तैर्न केवलमस्या नगर्याः, अपि तु सर्वस्यापि राष्ट्रस्य गरिमा प्रावर्द्धत। ते भारतशासनेन **'पद्मभूषण'** इति सम्मानोपाधिना सम्मानिताः। तेषां महनीयः शताब्दिसमारोहोऽपि भारतराजधान्यां देहल्यां वाराणस्यां कलिकातानगर्यां च महता समारम्भेण समायोजितः। तत्र च श्रद्धेयैः काशिकगौरवैः स्व० पण्डित-श्रीकमलापतित्रिपाठिमहोदयैः, पूर्व-प्रधानमन्त्रिभिः श्री-पी० वी० नरसिंहारावमहोदयैश्च तेभ्यः स्वकीयश्रद्धाञ्जलिः समर्पितः। महान्तो विद्वांसस्तैर्दीक्षिता अभवन्। तेषु माननीयानां **महामहोपाध्याय-श्रीगिरिधरशर्मचतुर्वेदि**सदृशानां विदुषां नाम विशेषतः स्मर्तुं शक्यते। ते जीवनमुक्ता अभवन्, तेषां च अभिनन्दनार्थं प्रकाशितः "गोपीनाथ कविराज अभिनन्दन-ग्रन्थ" इति ग्रन्थस्तन्त्रवाङ्मयस्यानुपमशब्दकोशत्वेन सर्वैः समादृतः। ते हि महनीयाया प्रातःस्मरणीयाया ब्रह्मलीनाया मातुः आनन्दमयीमहोदयायाः प्रेयांसः शिष्या आसन्, तस्या अनुग्रहेण कृतार्थितं च तेषां जीवनम्। अयमस्ति सौभाग्यस्य प्रसङ्गो यदनेन विश्वविद्यालयेन गतवर्ष एव महाबोधिसोसायटीद्वारा प्राप्तानुदानेनैका कविराजस्मारकव्याख्यानमाला प्रवर्तिता,

अस्याश्च स्थायिरूपेण व्यवस्था संवृत्ता, यया व्यवस्थया प्रतिवर्षं विशिष्टस्यैकस्य मनीषिप्रवरस्य भाषणद्वयं तस्य च प्रकाशनं सुनिर्णीतम्। मुख्यभवनसाम्मुख्ये विराजितायां मूर्त्तिवीथ्यां तेषां मूर्त्तिरपि विश्वविद्यालयेन संस्थापिता वर्तते। मन्ये, एभिर्विविधैः प्रकारैस्तेषां सभाजनार्थं विश्वविद्यालयेन कृताः प्रयासा अस्याः संस्थायाः कल्याणाय कल्पिष्यन्ते।

अस्यां व्याख्यानमालायां प्रथमं तेषामेव शिष्यैः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य सांख्य-योगतन्त्रागमविभागाध्यक्षचरैः, राष्ट्रपति-सम्मानितैर्विद्वद्वरेण्यैः **पण्डितश्रीव्रजवल्लभद्विवेदिभिः "वैष्णवागमविमर्शः"** इति विषयमधिकृत्य व्याख्यानद्वयं प्रदत्तम्। इदं प्रकाशनं तद्व्याख्यानद्वयमधिकृत्य प्रवर्तते। श्रीद्विवेदिमहोदया आगमशास्त्रस्य विश्वविख्याता विद्वांसो वर्तन्ते। तैः सम्पादितानां ग्रन्थानां सर्वत्र महान् आदरः। वस्तुतस्तु तैः स्वकीयया लेखन्या आगमशास्त्रस्य महती समृद्धिर्विहिता। तेषां लेखन-सम्पादनकौशलं गभीरं च पाण्डित्यमेतेषां प्रकाशनेऽवलोकयितुं शक्यते। ग्रन्थेऽस्मिन् वैष्णवागमेषु वैखानसागमस्य, पाञ्चरात्रागमस्य, भागवतागमस्य च साङ्गोपाङ्गं निरूपणं कृतम्, उपसंहारे च आगमानां नवनीतं प्रस्तुतम्। अयं हि ग्रन्थ आगमानां स्वरूपज्ञानाय महान् सहायको भविष्यति। तेन चास्या गभीरविद्याया अध्ययनेऽध्यापने च लोकानां प्रवृत्तिर्भविष्यतीत्यहं विश्वसिमि। ग्रन्थस्यास्य परिशिष्टे जितन्तेस्तोत्रं संयोज्य श्रीद्विवेदिमहोदयैरस्य श्रीवृद्धिः कृतेति हेतोस्तेऽस्माकमभिनन्दनभाजनानि।

व्याख्यानमालाया अस्याः संयोजने वर्तमान-सांख्ययोगतन्त्रागम-विभागाध्यक्षैर्विद्यासिद्धिसमवेतैः **श्रीरामजीमालवीय**महोदयैः कविराजमहोदयानां वाङ्मयी प्रतिमा साक्षात् प्रतिष्ठापितेति हेतोस्ते प्रशस्तिभिः सभाज्यन्ते। अन्ते ग्रन्थस्यास्य विशिष्टरूपेण शीघ्रप्रकाशनाय प्रकाशनाधिकारिणे **डॉ॰ हरिश्चन्द्रमणित्रिपाठिने**, मुद्रकाय तारायन्त्रालयस्य सञ्चालकाय **श्रीरविप्रकाश-पण्ड्या**महोदयाय च धन्यवादान् समर्पयन् ग्रन्थमिममागमशास्त्रमनीषिणां सेवायामुपहरामि।

**वाराणस्याम्**
मकरसङ्क्रान्तौ
वि॰ सं॰ २०५४

**मण्डनमिश्रः**
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

# प्रास्ताविकम्

अथायं समुपस्थाप्यते ''**वैष्णवागमविमर्शः**'' इति नामधेयो लघुग्रन्थ आगम-तन्त्रशास्त्ररुचीनां विदुषां पुरतः। अत्र वैष्णवागमानां दशविधानां रामानुजादिवैष्णवमतानां च सामान्यं परिचयं समुपस्थाप्य तदनु वैखानस-पाञ्चरात्र-भागवताख्यानां त्रिविधानां वैष्णवागमानां विशदं स्वरूपं समुन्मील्य च तेषां सामयिक उपयोगो निरूपित इति त एवास्य गुणदोषविवेचने पटवः।

महाभारतस्य शान्तिपर्वणि वर्तमाने नारायणीयोपाख्यानमिति नाम्ना प्रसिद्धे भागे— "जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन। नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज॥" (१२.३३६.४४) इत्ययं श्लोको दृश्यते। सोऽयं जितन्तामन्त्रनाम्ना लक्ष्मीतन्त्रे (२४.६७-७०,७४) प्रणवस्य परिमाणत्वेन वर्णितः। जितन्तामन्त्रो सात्वतसंहितायां प्रतिष्ठापरिच्छेदे स्थलद्वये (२५.२४४,३२५) स्मर्यते, सप्तमे च परिच्छेदे चतुर्षु श्लोकेषु (२५-२८) जितन्तामन्त्रचतुष्टयं वर्ण्यते। "अत्र प्रथमश्लोके प्रथमपादम्, द्वितीये द्वितीयम्, तृतीये तृतीयम्, चतुर्थे च चतुर्थं संगृह्य एकश्लोकरूपेण लक्ष्मीतन्त्रपाद्मादिषु प्रतिपादितम्" (पृ. १२७) इति सात्वतसंहिता-भाष्यकारोऽलशिङ्गभट्ट उल्लिखति। महाभारतोक्त एव श्लोको लक्ष्मी-तन्त्रेऽपि विद्यते (२४.६९)। जितन्ताख्यमन्त्रार्थनिरूपणे त्रिपञ्चाशेऽध्यायेऽ-हिर्बुध्न्यसंहितायां तस्यैव श्लोकस्य व्याख्यानदर्शनाच्च प्राचीनतमोऽयं श्लोक इति वक्तुं शक्यते। सोऽयं जितन्तामन्त्रः कदा स्तोत्ररूपेण परिणत इति ज्ञातुं न समर्था वयम्, अथापि शैवसम्प्रदाये महिम्नःस्तोत्रवद् वैष्णवसम्प्रदाये वर्ततेऽस्य महान् महिमा।

तदेतस्य स्तोत्रस्य पञ्चाध्यायात्मकस्य १८८६ ई. वर्षे, द्राविड़व्याख्यानसमलङ्कृतस्य षडध्यायात्मकस्य च १९५८ ई. वर्षे प्रकाशन-मजायत। नाद्य संस्करणद्वयमेतदुपलभ्यत इति सरस्वतीभवन-स्थितमातृकात्रयसाहाय्येन संशोध्य तदेतदत्र समावेश्यते।

अयमत्र वर्तते संस्करणद्वयस्य मातृकाणां च परिचयः —

पञ्चाध्यायात्मकं **जितन्तेस्तोत्रं** सटीकं जानोरीकरेत्युपाह्वमहादेवात्मजगणेशेन वेदान्तसच्छास्त्रनिष्णातविद्वत्प्रवरसार्थसाहाय्येन संशोध्य आर्यसेवकनाम्नि स्वकीयमुद्रणालयेऽङ्कित्वा प्रसिद्धमकारि। मुम्बापुर्यां पालवाख्यमार्गे, शक १८०८, सन् १८८६ ई.।

संस्करणमेतत् प्रधानाधारभूतं नूतनस्य संस्करणस्यास्य।

(क) जितन्तेस्तोत्रम् (पाञ्चरात्रागमे) सरस्वतीभवनप्रकाशितस्तोत्रसूच्यां १९११२ संख्यायां विवरणमस्य द्रष्टव्यम्।

(ख) जितन्तेस्तोत्रम् (पाञ्चरात्रागमे) सरस्वतीभवनप्रकाशितस्तोत्रसूच्यां १७९८१ संख्यायां विवरणमस्य द्रष्टव्यम्।

(ग) जितन्तेस्तोत्रम् (पाञ्चरात्रागमे ब्रह्मतन्त्रे) सरस्वतीभवन-प्रकाशितस्तोत्रसूच्यां १९४१४ संख्यायां विवरणमस्य द्रष्टव्यम्।

सर्वास्वेतासु मातृकासु पञ्चाध्यायात्मकमेव स्तोत्रं समुपलभ्यते। ग-मातृकायामाद्ययोः पत्रयोर्ग्रन्थान्तरं वर्तते, न सोंऽशो जितन्तेस्तोत्रभागः।

(घ) जितन्तेस्तोत्रम्, विद्वत्त्रयकृतद्रविड्व्याख्यानसमलङ्कृतम्। देवसालपुरी चम्पकमुद्रणालये मुद्रितम्। सन् १९५८. षष्ठोऽध्यायः केवलमत्रैव दृश्यते।

इतः पञ्चदशवर्षेभ्यः पूर्वमागमशास्त्रसम्बद्धानि त्रीणि प्रवचनानि येषां प्रेरणया मया सज्जीकृतान्यासन्, त एव साम्प्रतं वैष्णवागमविमर्शनाम्ना वैष्णवागमानां स्वरूपोन्मीलनाय मां प्रेरितवन्त इति शुभ एव संयोग उदन्तो वा मयि अद्भुतं रसं सञ्चारयतीव। त एते सन्ति स्वनामधन्याः संस्कृतभाषाया उन्नत्यै सततं बद्धपरिकरा **डॉ. मण्डनमिश्रमहोदयाः**। पूर्वं दिल्लीस्थश्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य प्राचार्यपदवीमलङ्कुर्वन्त एते तां संस्थां मान्यविश्वविद्यालयत्वेन प्रतिष्ठाप्य साम्प्रतं वाराणसीस्थ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिधुरां वहन्ति केन्द्रीय-संस्कृतविश्वविद्यालयपदवीमारोहत्वेष इति शुभसङ्कल्पं धारयन्तः। पूर्वं प्राचार्यपदवीमध्यतिष्ठन्त एते प्रवचनत्रयप्रदानाय मामाहूतवन्तः, **'आगममीमांसा'**

इति समाख्यया तानि प्रकाशितवन्तश्च। अधुना मान्यविश्वविद्यालयस्य कुलपतिपदतो गृहीतावकाशा अत्रागत्य वैष्णवागमविमर्शाख्यं प्रवचनं सज्जीकर्तुं मां नियोजितवन्त इति, तदर्थमत्रत्यसांख्ययोगतन्त्रागमविभागाध्यक्षा **डॉ. रामजीमालवीय**महोदयास्तान् प्रेरितवन्त इत्युभावेतौ महानुभावौ सर्वप्रथममाभारनिवेदनमुखेन सभाज्येते।

तदनु चास्याः संस्थायाः प्रकाशनाधिकारी श्रीमान् **डॉ. हरिश्चन्द्रमणित्रिपाठी**, तत्सहयोगिनश्च **श्रीहरिवंशकुमारपाण्डेयादयः** प्रकाशनकर्मणि मनोयोगेन संलग्ना आसन्। एवमेव तारायन्त्रालयस्य स्वामी **श्रीमान् रमाशंकरपण्ड्या** तत्सहयोगिनश्च भूयांसं कष्टं सोढ्वाऽपि ग्रन्थस्य सज्जीकरणे परिष्करणे च सम्यक् प्रवृत्ता अभूवन्निति सर्वे एते धन्यवादशतैः सभाज्यन्ते।

गीताजयन्ती, संवत् २०५४ — विद्वद्वशंवदः

वाराणसी। — **व्रजवल्लभद्विवेदः**।

•

# विषयानुक्रमणिका


| | |
|---|---|
| प्रस्तावना | क-ख |
| प्रास्ताविकम् | ग-ङ |

**वैष्णवागमविमर्शः**

| | |
|---|---|
| उपक्रमः | १-२ |
| त्रिविधा वैष्णवागमाः | २-३ |
| दशविधा वैष्णवसम्प्रदायाः | ३-८ |

**१. वैखानसागमः**

| | |
|---|---|
| वैखानसागमानां वेदानुवर्तित्वम् | ९-११ |
| दीक्षा | ११-१४ |
| साकार-निराकाराराधनम् | १४-१५ |
| ऐतिहासिकं विवेचनम् | १६ |
| वैखानसं वाङ्मयम् | १६-२० |
| वैखानसीयं दर्शनम् | २०-२५ |
| वैखानसीयो योगः | २५-२७ |
| क्रियाचर्यापक्षौ | २७ |
| सारसंक्षेपः | २७-२८ |

**२. पाञ्चरात्रागमः**

| | |
|---|---|
| पाञ्चरात्रशास्त्रस्य प्राचीनता | २९-३० |
| पाञ्चरात्रपदप्रवृत्तिनिमित्तम् | ३०-३१ |
| पाञ्चरात्रीयं वाङ्मयम् | ३१-३३ |
| पाञ्चरात्रीयं दर्शनम् | ३३-३६ |
| विभवावतारेषु लोकनाथो भगवान् बुद्धः | ३६-३८ |
| पाञ्चरात्रीयो योगः | ३८-३९ |
| पाञ्चरात्रीयाः क्रियाश्चर्याश्च (दीक्षा अभिषेकश्च) | ३९-४३ |
| पाञ्चरात्रागमपरिचायका ग्रन्थाः | ४३-४५ |

## ३. भागवतागमः

पञ्चविंशतिपाञ्चरात्रागमाः (हयशीर्षवर्णिताः) ४६-४८
नवभागवतागमाः (हयशीर्षवर्णिताः) ४८-४९
त्रिविधो मखः ४९
भक्तिप्रपत्तिसम्प्रदायः ४९-५०
षड्विधा शरणागतिः ५०-५१
भक्तिवाङ्मयम् ५१-५२
भक्ति-प्रपत्तिलक्षणम् ५२-५३
नवविधाऽष्टविधा वा भक्तिः ५३-५४
कोऽयं भगवान्? ५४-५६
शिवभक्तिवाङ्मयम् ५६
भक्तिपरिभाषा ५६-५७
भक्तेर्गरीयस्त्वम् ५७-५८
पञ्चाङ्गन्यासविद्या ५८-५९
भक्तिभेदोपभेदाः ५९-६०
अद्वैतलक्षणा भक्तिः ६०

## उपसंहारः

कर्मणामपि मोक्षप्रदत्वम् ६१-६२
ब्रह्मणो दशाद्वयम् ६२
ब्रह्मणः शक्तिद्वयं त्रयं वा ६२-६३
विशाखयूपो भगवान् ६३-६४
वैष्णवागमेषु कोऽधिकृतः ६४-६५

## परिशिष्टानि

जितन्तेस्तोत्रम् ६९-८६
जितन्तेस्तोत्र-श्लोकार्धानुक्रमणी ८७-९१
विशिष्टपदसूची ९२-१०७
सहायक-ग्रन्थसूची १०८-११६

●

# वैष्णवागमविमर्शः

## उपक्रमः

भारतीयवाङ्मये उपनिषदः, ब्रह्मसूत्राणि, भगवद्गीता चेति ग्रन्थत्रयी 'प्रस्थानत्रयी' इति नाम्ना प्रथिताऽऽस्ते। एतानि क्रमशो भारतीयायाः श्रौतपरम्परायाः, दार्शनिकपरम्परायाः, स्मार्तपरम्परायाश्च प्रातिनिध्यमातन्वन्ति। प्रायः सर्वैरेवाचार्यैः स्वस्वमतप्रतिष्ठायै 'प्रस्थानत्रयी' स्वस्वभाष्यव्याख्यानादिभिः समलङ्कृता। एतेषु भगवतः शङ्कराचार्यस्य भाष्यग्रन्था अनितरसाधारणा इति वक्तुं शक्यते। न परवर्तिना केनाप्याचार्येण तन्मतं समर्थितम्। अत्र साम्यापेक्षया वैषम्यमेवाधिक्येन दृश्यते। वैष्णवमतानुयायिनां शैवमतानुयायिनां च भाष्यकाराणां दृष्टयः क्वचन साम्यं क्वचन वैषम्यं च धारयन्ति। तेषु वैषम्यापेक्षया साम्यमेवाधिक्येनावलोक्यते।

अत्र कारणजिज्ञासायामिदमेव प्रतिभाति यदाधारभेदेन केनापि भाव्यमिति। स्रोतोभेदेन विचारभेदोऽयं समजायत इति तज्जिज्ञासायां निगमा [१]आगमाश्च तदाधारा इति निर्णेतुं शक्यते। ब्रह्मसूत्रे तर्कपादे सांख्ययोगादिभिः सह पाशुपताः (शैवाः) पाञ्चरात्राश्च (वैष्णवाः) सिद्धान्ता वेदविरोधिन इति तेषां प्रामाण्यं नाङ्गीकर्तुं शक्यत इति भगवत्पादशङ्कराचार्याः सिद्धान्तयन्ति। तद्विपरीतं शैवा

---

१. सृष्टिश्च प्रलयश्चैव देवतानां तथार्चनम् ।
साधनं चैव सर्वेषां पुरश्चरणमेव च ॥
षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तमागमं तद् विदुर्बुधाः ॥

आगमशब्दार्थनिरूपणावसरे श्लोकद्वयमेतत् प्रायः सर्वेष्वपि तन्त्रागमसम्बद्धेषु साम्प्रतिकेषु ग्रन्थेषु स्मर्यते। "पांचरात्रागम" इति ग्रन्थस्य लेखको वाराहीतन्त्रवचनत्वेन तदुद्धृतवान्। स एव "भारतीय तन्त्रशास्त्र" इत्याख्ये ग्रन्थे समाविष्टे "वैखानस आगम" इति शीर्षके निबन्धे च पाद्मसंहितावचनमेतदित्युक्तवान् (पृ.४०५)। पाद्मसंहितायां गवेषणीयमेतत्।

वैष्णवाश्च आचार्याः स्व-स्व-सिद्धान्तान् वेदाविरोधिन इति साधयन्ति। एषैव सा दृष्टिः, ययाऽनुप्राणिताः शैवा वैष्णवाश्चाचार्याः शाङ्करमतं प्रायो नाङ्गीकुर्वन्ति, परस्परं वैषम्ये जागरूके सत्यपि चागमप्रतिपादितेषु जगत्सत्यत्वादिवादेषु साम्यमेव प्राधान्येन धारयन्ति। फलतः कृतान्तपञ्चकस्य प्रामाण्यं स्मृतिपुराणादिष्वप्यङ्गीकृतम्।

पाञ्चरात्रपाशुपतादिमतानां चर्चा संहिता-ब्राह्मणादिग्रन्थेष्वपि वरीवर्ति। शतपथ-ब्राह्मणे (१३-६-१) पाञ्चरात्रसत्रम्, छान्दोग्योपनिषदि (७.१.२) चैकायनविद्या श्रूयते। संहितारण्यकादिग्रन्थेषु पञ्चब्रह्मपदेनाभिधीयमानस्य ईशानादिपञ्चमन्त्रतनोर्भगवतो महादेवस्य समाराधनं विहितमास्ते। वागाम्भृणीत्यादिसूक्तेषु भगवत्याः समाराधनं विधीयते, केनोपनिषदि च उमा हैमवती स्तूयते। निगमागमयोः प्राचीनताविषयिणी चर्चा निष्परिणामैव स्यादिति कृत्वा परित्यज्य तां साम्प्रतमेतावदेव वक्तव्यं यदेते त्रिविधा अपि वैष्णव-शैव-शाक्तागमा बौद्ध-जैनमतवन्न निगमानामप्रामाण्यं साधयन्ति, किन्तु तत्प्रामाण्यमभिप्रयन्त एव प्रवर्तन्ते। एवमेव महाभारतपुराणादिषु त्रिविधानामप्येतेषामागमानां प्रामाण्यं यथायथमङ्गीक्रियते। एवं सत्यपि सगुणता साकारता च, जीवाणुत्ववादः, जगत्सत्यता, मुक्तिसाधनेषु भक्तेः प्राधान्यमित्येवमादयः सिद्धान्ता आगमानां वैशिष्ट्यं ख्यापयन्ति । एवं च ब्रह्मसूत्राण्याधृत्य प्रवृत्तानां विभिन्नानां मतवादानां साम्यवैषम्यपरीक्षायै सर्वेषामेतेषामागमानामनुशीलनं नितान्त-मपेक्षितमिति कृत्वा ईशवीये १९८२ (द्व्यशीत्युत्तरैकोनविंशतिशततमे) वत्सरे प्रकाशितायामागममीमांसायामस्माभिस्त्रिविधस्यागमस्य वैष्णव-शैव-शाक्ताख्यस्य यदैतिहासिकं दार्शनिकं सांस्कृतिकं च स्वरूपं विवेचितम्, तत्र त्रिभेदभिन्नस्य वैष्णवागमस्यापि समावेश आसीदेव । अत्र पुनः केवलं वैष्णवागमानामेव स्वरूपमुन्मीलयितुं कृतः प्रयत्न एष किमपि नावीन्यमुद्भावयितुं क्षमो भवेच्चेदत्र संविदेव भगवती नः शरणम्।

## त्रिविधा वैष्णवागमाः

"पाञ्चरात्रं भागवतं तथा वैखानसाभिधम्" इति त्रिविधा वैष्णवागमाः श्रूयन्ते। बाणभट्टस्य महाकवेर्हर्षचरिताख्ये गद्यमहाकाव्ये भागवताः पाञ्चरात्राश्च पृथक्तया वर्ण्यन्ते। हयशीर्षपञ्चरात्रेऽपि (आदिकाण्डे २. २-९)

पञ्चविंशतिपाञ्चरात्रागमानां [1]भागवतागमानां च नामावली वर्तते। पञ्चविंशतिपाञ्चरात्रागमानां हयशीर्षपञ्चरात्रोपदर्शितानां नामावली अग्निपुराणेऽपि (३९. २-५) दृश्यते, न भागवतागमानाम्। एतेनापि पाञ्चरात्रागमानां [2]भागवतागमानां च वैभिन्त्र्यं सिद्ध्यति। वैखानसागमाश्च साम्प्रतं प्रसिद्धा एव। तेषु नैके आगमास्तिरुपतिनगरीतः प्रकाशिता उपलभ्यन्ते।

## दशविधा वैष्णवसम्प्रदायाः

शक्तिसङ्गमतन्त्रे (१.८.३८-४०) दशविधा वैष्णवसम्प्रदाया वर्ण्यन्ते। तत्र वैखानस-पाञ्चरात्र-भागवतागमेभ्यो भिन्ना राधावल्लभ-गोकुलेश-वृन्दावनि-वीरवैष्णव-रामानन्दि-हरिव्यासि-निम्बार्काख्याः सप्तान्येऽपि वैष्णवसम्प्रदाया विशेषतो विवृताः सन्ति। एतेषु त्रयाणामागमेषु शिष्टानां च वैष्णवसम्प्रदायेषु समावेशो विधेयः। तत्रागममीमांसायामस्माभिर्वैखानस-भागवतागमयोरतीव संक्षेपेण, पाञ्चरात्रा-गमस्य च किञ्चिदिव वैशद्येन परिचयः प्रदत्त आसीत्, अधुना च सर्वेषामेषां वैष्णवागमानां सम्प्रदायानां च यथोपलब्धं विवरणमुपस्थापयितुमयमुद्यमः।

शक्तिसङ्गमतन्त्रस्य प्रथमे कालीखण्डेऽष्टमे पटले १-८५ श्लोकेषु दशविधा वैष्णवाः, सप्तविधाः पाशुपताश्च विस्तरेण वर्णिताः। तत्रैव वैखानसादिदशविध-वैष्णवानां वासनाः प्रदर्शिताः। वेवेष्टि, सर्वं संव्याप्य यस्तिष्ठति, स वैष्णव इति वैष्णवपदस्य सामान्यां निरुक्तिं प्रदर्श्य— १. वैखानसदीक्षया भूषितः स्मार्तवैष्णव एव **वैखानस** इति; २. वैष्णवाचारनिरतो विष्णुतन्त्रैकपारगोऽनन्यचेताः शान्तात्मा विष्णुचिह्नपरायणः **श्रीराधावल्लभ** इति; ३. नानाभूषणसम्पन्नो नानासौगन्ध्यभूषितः कृष्णस्वरूपधृग् अन्तः शक्तिपरो बहिर्वैष्णवरूपधृग् गन्धर्वाचारनिरतो लतावेष्टनतत्परो **गोकुलेश** इति; ४. विगताशः प्रसन्नात्मा विष्णुभक्तिपरायणः कामिनीसङ्गचपलो वनक्रीडाविनोदधृक् सौगन्ध्यभूषिततनुः

---

१. प्रकरणस्यास्य पुनः परीक्षणमग्रे विधास्यते।

२. अग्रे समुद्धरिष्यमाणेन—"निगमस्तान्त्रिको मिश्रस्त्रिविधः प्रोक्त आगमः।। निगमो विखनःप्रोक्तो मिश्रो भागवतः स्मृतः। चतुःसिद्धान्तसहितः पाञ्चरात्रस्तु तान्त्रिकः।।" (८.१३-१४) इत्यानन्दसंहितावचनेनापि त्रैविध्यं वैष्णवागमानां सिद्ध्यति।

स्त्रीध्यानैकपरायणो विष्णुसारूप्यतत्त्वज्ञो **वृन्दावनीति**; ५. दिनपञ्चकपर्यन्तं शैवानां न विलोकनमिति पञ्चरात्रव्रतं प्राप्तः शिवनिन्दापरायणः **पाञ्चरात्र** इति; ६. केवलं विष्णुनिरतः सर्वदेवप्रनिन्दको **वीरवैष्णव** इति; ७. 'रा' शक्तिरिति विख्याता, मः शिवः परिकीर्तितः, तदानन्दी शान्तचित्तः प्रसन्नात्मा विचारधृक् सर्वत्र समरूपश्च **रामानन्दीति**; ८. पापसंहरणे शक्तो विष्णुभक्तो जितेन्द्रियो यमनियमैर्युक्तस्त्यक्ताचारः सोपयोगफलग्राही परकार्यपरायणः शिवशक्तिस्वरूपधृग् **हरिव्यासीति**; ९. नित्यार्चनक्रमासक्तः स्वतन्त्रैकपरायणो बाह्यपूजानिरतोऽनन्यभक्तः प्रसन्नधीः स्वच्छः स्वच्छन्दाचारनिरतः स्मार्तविद्वेषी **निम्बार्क** इति; १०. विष्णुभक्तो निपुणो विजितात्मा प्रसन्नधीः स्मार्तकर्मान्वित आचारतत्परोऽरुणवेषधृक् शैवद्वेषी तस्य सङ्गात् पुनः स्नानपरायणो विष्णुचित्तज्ञो **भागवत** इत्येवं समेषां दशविधानां वैष्णवानां लक्षणानि च सम्प्रदर्श्य तेषामेकादश्यादितिथीनां निर्णयोऽपि तत्र विस्तरेण (६१-८२ श्लोकेषु) वर्णितः। अन्ते च—

**सुरेन्द्रसंहिता देवि तथा षट्शाम्भवः शिवे ।**
**गोपालपाञ्चरात्रं च षडन्वयमतं तथा ।।**

**श्रीगोपीपरिशिष्टं च मोहशक्तीश्वरस्तथा ।**
**षट्शाम्भवरहस्यं च क्रमादेते प्रकीर्तिताः ।।**

**एतद् ग्रन्थक्रमाद् देवि विवेचनमुदीरितम्** ।(१.८.८३-८५)

इत्येवं प्रकरणमेतदुपसंहृतम्। अस्मिन्नेव पटले पाषण्ड-कापालिक-चीन-जैन-बृहद्गुरु-शाक्त-शैव-चान्द्र-स्वायम्भुव-दौर्गादिमतानि संलक्ष्य चतुर्विधा [१]मुद्रा वर्णिता। सर्वमेतन्नैव प्रकृतोपयोगीति केवलं सूच्यते।

---

१. बौद्धतन्त्रप्रयुक्तेऽर्थेऽत्र (१.८.३६) मुद्राशब्दः प्रयुक्तो दृश्यते। मुद्रापदस्य नानाविधा अर्थाः "दुर्लभ बौद्ध ग्रन्थ शोधयोजना, केन्द्रीय तिब्बती उच्च शिक्षा संस्थान, सारनाथ" इत्यतः प्रकाश्यमानायाः 'धीः' इत्याख्यायाः षाण्मासिक्याः पत्रिकायाः प्रथमेऽङ्के (पृ. ११३-११५) द्रष्टव्याः। वैष्णवागमेषु पाशुपतागमेषु च वर्णितास्तप्तमुद्राषण्मुद्राद्यास्ततो भिन्नप्रकारा एव।

वैष्णवेष्वितो भिन्ना अपि रामानुज-मध्व-वल्लभ-चैतन्यादीनां सम्प्रदाया विशेषतो राजन्ते। सायण-माधवेन पूर्णप्रज्ञ(मध्व)-दर्शनपरिचयारम्भे पाञ्चरात्रोपजीव्यत्वमुभयो रामानुजमध्वमतयोरभिप्रेयते । ब्रह्मसूत्रीये तर्कपादेऽन्तिममधिकरणं पाञ्चरात्राधिकरणनाम्ना प्रायः परिचीयते। भगवत्पादशङ्कराचार्या अत्र पाञ्चरात्रमतस्यांशिकं खण्डनमिति, रामानुजाचार्याश्च तस्य समर्थनमित्यङ्गीकुर्वन्ति। अन्ये वैष्णवाचार्या मध्व-निम्बार्क-बलदेवविद्याभूषणाश्च पादासंगतिदोषमुत्प्रेक्ष्यात्र शाक्तमतं समालोच्यत इति वदन्ति। प्रायः सर्वेऽपि वैष्णवाचार्याः पाञ्चरात्रागमान् वेदवत् सम्मानयन्ति। शाङ्करमतेन सह वैष्णवाचार्याणां मतभेदा वैष्णवागमप्रयुक्ता एवेति सर्वेऽपि मनीषिणो ज्ञानन्ति, ये हि भक्ति-प्रपत्तिसिद्धान्तस्य प्राधान्येन प्रतिपादकाः।

ब्रह्म सत्यं जगन्मिथ्येति सिद्धान्तो न वैष्णवाचार्यैरङ्गीक्रियते। सर्वं ब्रह्मविलसितमिति कृत्वा जीवजगतोः परमार्थता जीवस्याणुभावश्च न केवलं वैष्णवेषु, प्रत्यभिज्ञादिशैवसिद्धान्तेषु च दृढतया स्थाप्यते। वैष्णवाचार्येषु केवलं वल्लभाचार्येण पाञ्चरात्रमतं खण्ड्यते, यतो हि स भागवतसम्प्रदाये श्रद्धातिशयं धारयति। अत एव प्रस्थानचतुष्टयीसंस्थापकत्वेन स परिगण्यते। एवं सत्यपि जगदादिसत्यत्वविषये स आगमानेवानुसरति। एवं च साम्प्रतमुपलभ्यमानाः सर्वेऽपि वैष्णवसम्प्रदायास्तदेतेषां त्रिविधानां वैष्णवागमानां वैखानस-पाञ्चरात्र-भागवताख्यानां यथायथं श्रुतिसमकक्षं प्रामाण्यमङ्गीकुर्वन्तो वैदिकीं तान्त्रिकीं चेति द्विविधां श्रुतिं प्रमाणयन्ति।

शक्तिसङ्गमतन्त्रस्य खण्डत्रयसम्पादकेन श्रीमता डॉ. विनयतोषभट्टाचार्यमहोदयेन प्रथमखण्डप्रस्तावनायां (पृ. ६-७) निम्बार्क-रामानन्दाद्यपेक्षया राधावल्लभ-हरिव्यासादिसम्प्रदायानामर्वाचीनत्वं साधितम्[१]। तदेतेषामन्येषां च वैष्णवसम्प्रदायानां परिचयः पण्डितप्रवर-श्रीबलदेव-उपाध्यायरचिते हिन्दीभाषामये "भागवत सम्प्रदाय" इत्याख्ये ग्रन्थे द्रष्टुं शक्यते। तत्र हंससम्प्रदाय-सनकादिसम्प्रदाय-देवर्षिसम्प्रदायपदैरभिधीयमानस्य **निम्बार्क**सम्प्रदायस्य प्रवर्तको द्वादशशताब्दीभवो निम्बार्काचार्यो द्वैताद्वैतसिद्धान्तपद्धत्या बादरायणीयानि शारीरकसूत्राणि व्याख्यातवानिति

---

१. प्रसङ्गेऽस्मिन् शक्तिसंगमतन्त्रचतुर्थखण्डस्य छिन्नमस्ताख्यस्य संस्कृतभाषामयोऽस्मदीय उपोद्घातोऽपि द्रष्टव्यः (पृ. ८-९)।

जानीमो वयम्। अस्य सम्प्रदायस्य विस्तृतः परिचयः पूर्वोक्ते ग्रन्थे (पृ. ३१२-३५०) निम्बार्कभाष्यभूमिकायां च द्रष्टव्यः। 'सखी सम्प्रदाय' इति नाम्ना वृन्दावने प्रसिद्धोऽस्यैवाऽवान्तरसम्प्रदायः शक्तिसंगमतन्त्रे **वृन्दावनीति** नाम्ना परिचायितः स्यात्। अस्यापि परिचयस्तत्रैव (पृ. ३५०-३६२) प्रदत्तः। स्वामिपादानां राघवानन्दानां शिष्या **रामानन्दीति** सम्प्रदायस्य प्रवर्तका रामानन्दस्वामिनश्च वैष्णवाचार्यरामानुजस्य शिष्यपरम्परायां पञ्चदश्यां शताब्द्यामाविर्भूता वैष्णवमताब्जभास्करप्रभृतीन् ग्रन्थान् रचयामासुः। कबीर-रविदाससदृशा महात्मानोऽस्यैव शिष्या आसन्। 'रामावत सम्प्रदाय' इति शीर्षके प्रकरणे पूर्वोक्ते ग्रन्थे (पृ. २३१-२८७) उपाध्यायमहोदयैरस्यापि सम्प्रदायस्य कबीरप्रभृतीनां तच्छिष्याणां च विस्तृतः परिचयः समुपस्थापितः।

इदं चात्रावधेयम्—रामानुजात् परं तस्य शिष्यपरम्परा द्विधा विभक्ता। तत्रैका नाथमुनि-यामुनाचार्यप्रभृतीनामाचार्याणां परम्परां प्राधान्येनानुसरति स्म, अन्या च पाञ्चरात्रागमपरम्परया सह तमिलभाषायां रचितमालवारवाङ्मयम्। वेदान्तदेशिकः प्रथमां लोकाचार्यश्चापरां परम्परामनुसरतः। गच्छता कालेन तयोरेतयोर्मतयोः परस्परमष्टादशविधा भेदाः प्रादुरभूवन्, रामानन्देन च स्वकीये वैष्णवमताब्जभास्करे ते विवृताः।

पाञ्चरात्रागमाश्चतुर्धा विभज्यन्ते। तत्र प्राचीनासु संहितासु वासुदेवः परब्रह्मत्वेन समर्च्यते। नारायणीयोपाख्यानेऽन्यासु कासुचन पाञ्चरात्रसंहितासु वैखानसागमे च नारायणः, इतरासु रामः, अन्यासु च कृष्णः परब्रह्मत्वेन निराकारसाकारभेदेन समाराध्यते। रामानुजाचार्यस्य साक्षाच्छिष्यः कूरेशो रामभक्तिपरम्परां समनुस्मरति स्म। रामानन्दस्तामेव परम्परामङ्गीकृतवान्। एवं च रामभक्ति-(रामावत)सम्प्रदायस्याद्यः प्रवर्तको रामानन्दगुरू राघवानन्द इति हिन्दीभाषाग्रन्थेषु स्थापितं मतमेतन्नैव समीचीनमित्यत्रावधातव्यं साम्प्रतिकैस्तद्भाषापण्डितैः। सन्तकबीरेण स्थापिताः सिद्धान्ता अपि नैव तदुपज्ञाः, किन्तु विज्ञानभैरवसदृशानद्वैतवादिनः काश्मीरागमान् समनुसरन्तीति प्रतिपादितमस्माभिः "सन्त कबीर के प्रेरक तत्त्व" इति शीर्षके निबन्धे "निगमागम संस्कृति" इति नामधेये हिन्दीभाषामये ग्रन्थे संगृहीते (पृ. ४९-५४), इति जिज्ञासुभिस्तत एवावलोकनीयमित्यलमप्रासङ्गिकेन।

प्रकृतमनुसरामः— **राधावल्लभीय**सम्प्रदायस्य प्रवर्तका हितहरिवंशगोस्वामिन इति तेषां तदीयग्रन्थानां सिद्धान्तानां च विस्तरेण परिचयः पूर्वोक्ते ग्रन्थे (पृ. ४२१-४६४) एव द्रष्टव्यः। १५०३ ई. वर्षे ते स्वजनुषा मथुरामण्डलमलञ्चक्रुरिति तत्रैव (पृ. ४२१-४२२) वर्ण्यते। **हरिव्यासि**सम्प्रदायस्य प्रवर्तका हरिव्यासाश्च निम्बार्कमतान्तर्गतस्य रसिकसम्प्रदायस्य प्रवर्तका इत्यपि त एव वर्णयन्ति। ई. षोडशशताब्दीसमाप्तौ जन्म एषामनुमीयते। वल्लभसम्प्रदायानुयायिषु सूरदासस्येव निम्बार्कमतावलम्बिषु हरिव्यासस्य स्थानं विद्वांसः स्वीकुर्वन्ति। एतेषां ग्रन्थादीनां परिचयस्तत्रैव (पृ. ३३४-३३४) द्रष्टव्यः। **गोकुलेशः** सम्प्रदायः श्रीमतो वल्लभाचार्यस्य पुष्टिमार्गप्रवर्तकस्य पौत्रेण गोकुलनाथेन सम्राजो जहाँगीरस्य राज्यकाले प्रवर्तितः। **वीरवैष्णव**पदेन कस्य सम्प्रदायस्य ग्रहणमिति विचारणीयमास्ते। वीरशैववद् वीरवैष्णवपदेन कार्णाटको माध्वसम्प्रदायो ग्रहीतुं शक्यते। "केवलं शिवसम्पन्नस्त्वन्यदेवस्य निन्दकः॥ वीरशैवेति गदितो वीराख्यं वैष्णवं शृणु। केवलं विष्णुनिरतः सर्वदेवप्रनिन्दकः॥ वीरवैष्णव इत्युक्तः पापभाजौ नरावुभौ" (१.८.२७-२९) इत्येवं हि शक्तिसङ्गमतन्त्रे उभौ मतौ सहैव वर्ण्येते।

विवरणेनानेन ज्ञायते यद् वैखानस-पाञ्चरात्र-भागवतातिरिक्तमत्र निर्दिष्टाः सप्तसम्प्रदायास्त्रिभेदैरेभिर्वैष्णवागमैः प्रसृतेषु रामानुजनिम्बार्कादिषु वैष्णव-सम्प्रदायेषु समावेष्टुं शक्यन्ते। कथमेभिस्त्रिभेदभिन्नैर्वैष्णवागमैर्विविधा वैष्णव-सम्प्रदायाः प्रसृतिं लेभिरे? कियांस्तत्र वर्तते श्रुति-स्मृति-पुराणानां प्रभाव इति किल वर्तते गभीराया गवेषणाया विषयः। वैष्णवदर्शनेषु साम्प्रतं रामानुज-निम्बार्क-मध्व-वल्लभ-चैतन्याख्यानि दर्शनानि प्रथितानि सन्ति। एतानि यथायथं द्वैत-द्वैताद्वैत-अद्वैतदृष्टिं समनुसरन्ति। आगमेष्वपि ता एता दृष्टयो व्यावर्ण्यन्ते। गच्छता कालेन एतेषां सर्वेषां वैष्णवागमानां प्रभावेण घातप्रतिघातात्मकेन विमर्शेन च कथं नाम एता दृष्टयः प्रस्फुटिता इति तौलनिकानुशीलनेनैव स्पष्टीभवेदित्येतदर्थं त्रिविधानां वैष्णवागमानां परिचयः प्रस्तूयते।

एतेषु वैखानसः सम्प्रदायः साम्प्रतमान्ध्रप्रदेशे प्राधान्येन तत्समीपवर्तिषु तमिलनाडु-कर्णाटकप्रदेशीयेषु नगरेषु ग्रामेषु च सामान्येन प्रचलति। तिरुपतिं निकषा श्रीशैलवसतेर्भगवतो वेङ्कटेशस्य समाराधनं वैखानसागमपद्धत्या भवति।

पाञ्चरात्रः सम्प्रदायस्तमिलनाडुप्रदेशे प्राधान्येन प्रवर्तते। श्रीरङ्गवसतेर्भगवतो रङ्गनायकस्योपासा पाञ्चरात्रागमपद्धत्या सम्पाद्यते। तन्त्रभागवत-श्रीमद्भागवतादिषु प्रतिपादितो भागवतः सम्प्रदाय उत्तरे भारते साम्प्रतं प्रवर्तत इति वक्तुं शक्यते। क्रमेण तदेतेषां साहित्यसिद्धान्तयोः प्रख्यापनमेवास्य लघुग्रन्थस्य रचनाप्रयोजनम्। वैष्णवागमेषु समुपलब्धेषु वैखानससूत्राणि प्राचीनानीत्यैतिहासिकाः[१] स्वीकुर्वन्ति। अतोऽत्र सर्वप्रथमं वैखानसागमश्चर्च्यते।

●

१. डॉ. जे. गोण्डारचितः "मिडीवल रिलीजियस लिटरेचर" इत्याख्यो ग्रन्थो द्रष्टव्यः (पृ. १४३)।

# वैखानसागमः

वैखानसागमस्य आनन्दसंहितायां (८.२३-२४) पूर्वोक्तास्त्रिविधा वैष्णवागमा एवं वर्ण्यन्ते—

**निगमस्तान्त्रिको मिश्रस्त्रिविधः प्रोक्त आगमः ।**
**निगमो विखनःप्रोक्तो मिश्रो भागवतः स्मृतः ।।**
**[1]चतुःसिद्धान्तसहितः पाञ्चरात्रस्तु तान्त्रिकः। इति ।**

अत्र वैखानसागमो[2] निगमपदेन प्रोक्तः। अस्यायमभिप्रायो यदयमागमो निगमान् वेदान् प्राधान्येनानुसरतीति। वैखानसानां हि सर्वे संस्कारा आध्यात्मिका गृह्याश्च वैखानसशास्त्रपद्धत्यैव सम्पाद्यन्ते। एते देवालयाराधनेन सह श्रौतान् सर्वविधान् गृह्यांश्च क्रियाकलापान्, येषु किलाष्टादशसंस्काराणां[3] षड्विंशतिविधानां[4] यागानां

१. आगम-मन्त्र-तन्त्र-तन्त्रान्तराख्याश्चत्वारः पाञ्चरात्रसिद्धान्ता डॉ. अशोककुमारकालियाकृते निबन्धे द्रष्टव्याः (संस्कृत. तन्त्रागम खण्ड, पृ. ९५-९७)।

२. "वैखानसं हि निगमः पाञ्चरात्रं तथागमः" (आ. सं. ९.५), "वैखानसं पाञ्चरात्रं वैदिकं तान्त्रिकं क्रमात्" (आ. सं. १३.१) इत्यत्रापि स एवार्थः प्रतिपाद्यते। "विष्णोस्तन्त्रं द्विधा प्रोक्तं सौम्यमाग्नेयमित्यपि। सौम्यं वैखानसं प्रोक्तमाग्नेयं पाञ्चरात्रकम्। सौम्याग्नेये तथा प्रोक्ते शास्त्रे वैदिकतान्त्रिके।" (खिला. ४१.१-२) अत्र च वैष्णवतन्त्रं द्विधा विभज्यते— सौम्यं वैखानसम्, आग्नेयं च पाञ्चरात्रमिति। अत्र भागवताख्यस्तृतीयः प्रकारो न दृश्यते। शिवोपदिष्टानि तन्त्राण्यागमपदेन शक्त्युपदिष्टानि च निगमपदेन प्रोच्यन्त इत्येतदर्थकं श्लोकद्वयं वाराहीतन्त्रीयं बहुषु ग्रन्थेषु स्मर्यते। अत्रापि निगमपदं स्वीयश्रेष्ठत्वप्रदर्शनाय प्रयुक्तमिति प्रतिभाति।

३. अष्टादशसंस्काराणामेषां वैखानसगृह्यसूत्रे वर्णितानामन्येषां च विभिन्नेषु गृह्यसूत्रेषु निर्दिष्टानां परिचयः "पाञ्चरात्रागम" इत्याख्ये ग्रन्थे (पृ. ३०९-३२०) द्रष्टव्यः।

४. गौतमधर्मसूत्रे, शैवशाक्तागमेषु, केषुचित्पुराणेषु चाष्टाचत्वारिंशत्संस्काराणाम्, येषु हि अष्टौ आत्मगुणा अपि परिगण्यन्ते, विशेषेण परिचयः समुपलभ्यते। लुप्तागमसंग्रहीयोऽस्मदीय उपोद्घातः (पृ. २०५, टि. २), बृ. इतिहासस्य तन्त्रागमखण्डे समाविष्टः "पुराणगत योग एवं तन्त्र" (पृ. ५२५-५४०) इति निबन्धश्च द्रष्टव्यः। षड्विंशतिविधानां यागानां तत्रैवान्तर्भावो भवति।

च समावेशो भवति, स्वशास्त्रपद्धत्यैव वेदानुवर्तिन्या निर्वहन्ति। वैखानसा वैष्णवा वैदिकीं पद्धतिमेव सर्वश्रेष्ठां मन्वते। नित्यनैमित्तिकाद्यनुष्ठानावसरे च प्रामुख्येन वैदिकान् मन्त्रानेव व्यवहरन्ति, न हुंफडादीन् तान्त्रिकान्। [1]मुद्रा-मन्त्रोद्धार-मातृकाचक्र-सदृशास्तान्त्रिका विषया अप्यत्र नैव दृश्यन्ते। मन्त्रेषु प्रणवस्य माहात्म्यातिशयोऽत्र वर्ण्यते।

## वैखानसानामागमानां वेदानुवर्तित्वम्

तथा हि मरीचिकृते विमानार्चनकल्पे त्र्यशीतितमे पटले— "अथातो मन्त्राणां कल्पं व्याख्यास्यामः", "अथातः प्रणवस्वरूपं वक्ष्ये", "अथ सावित्रीकल्पं वक्ष्ये" इत्येवमादिना प्रधानतो वैदिकमन्त्राणां प्रणवस्य सावित्रीमन्त्रस्य च विस्तरेण वैभवं वर्ण्यते। त्रिकालसन्ध्याविधानध्यानादीनां स्वरूपमप्यत्र सार्वात्म्येन वैदिकीं पद्धतिमेवानुसरति। यजुर्वेदीये सर्वानुक्रमसूत्रे प्रथमायां कण्डिकायाम्— "एतानि (ऋषिदेवताच्छन्दांसि) अविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवति, अथान्तराश्वगर्ते वा पद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान् भवति। अथ विज्ञायैतानि योऽधीते तस्य वीर्यवत्। अथ योऽर्थवित् तस्य वीर्यवत्तरं भवति, जप्त्वा हुत्वेष्ट्वा तत्फलेन युज्यते" इतिवदत्रापि प्रत्येकं मन्त्राणामृषिदेवताच्छन्दसां ज्ञानं नितान्तमपेक्षितमिति सश्रद्धं वर्ण्यते।

एकादशशताब्दीभवेन वैखानसमतानुयायिना श्रीनिवासमखिना वैखानसत्वसाधका दशविधा ये हेतवो निर्दिष्टास्तेनाप्यस्यागमस्य भागवतपाञ्चरात्रागमापेक्षया प्राधान्येन वेदानुवर्तित्वं सिद्ध्यति। तथाहि तेन— १. अखिलजगत्कारणभूतेन विखनसा प्रणीतत्वात्, २. सर्वसूत्राणामादिमत्त्वात्, ३. प्रधानादिकर्मसु श्रुतिमार्गानुसारित्वात्, ४. समन्त्रकसर्वक्रियात्वात्, ५. निषेकादिसंस्कारत्वात्, ६. अष्टादश-शरीरसंस्कारात्मकत्वात्, ७. साङ्गक्रियाकलापत्वात्, ८. मन्वाद्यैः स्वीकृतत्वात्, ९. अखिलजगदेककारणभूतश्रीनारायणैकपरत्वात्, १०. तत्सूत्रोक्तमधर्मानुष्ठानवतामेव

---

१. वैखानसागमेषु करमुद्राविरचनं नैव वर्ण्यत इति डॉ. राघवप्रसादचौधरीकृते निबन्धे द्रष्टव्यम् (भारतीय तन्त्रशास्त्र, पृ. ४२२)।

भगवत्प्रियतमत्वोपपत्तेश्च— इत्येते दश हेतवो वैखानसागमप्रामाण्यसाधनाय निर्दिष्टाः। एते हेतवोऽस्यागमस्य वेदानुवर्तित्वं प्राधान्येन ख्यापयन्त्येव, एतैः केचनान्येऽपि विषया विशदीभवन्ति। तथा हि—

[1]आनन्दसंहिता-यजुःक्रियाधिकार-महाभारतशान्तिपर्व-नृसिंहपुराणादिप्रामाण्येन ब्रह्मणो विष्णोर्वाऽवतारेण निखिलजगत्कारणभूतेन विखनसा मुनिना कृष्णयजुर्वेदीया-मौखेय[2]-शाखामाधृत्य वैखानसो धर्मः प्रवर्तित इति, भगवान् नारायण एवात्र परब्रह्मस्थानीय इति, मन्वादिस्मृतीनामप्यत्र प्रामाण्यमङ्गीक्रियत इति च। वैखानसानां वेदानुवर्तित्वमग्रेऽपि चर्चिष्यते।

**दीक्षा**

वैखानसदीक्षाया अपि तन्त्रान्तरेभ्यो भिन्न एव प्रकारः। वैखानसमते तदनुयायिनः साक्षाद् विष्णुनैव दीक्षिता भवन्ति। एते च गर्भवैष्णवपदेन सम्बोध्यन्ते। विष्णुयजनार्थं पार्थक्येन दीक्षाग्रहणमत्र नानुमतम्। तत्स्थाने गर्भचक्रसंस्कारोऽत्र सम्पाद्यते, विष्णुबलिनाम्ना च सोऽभिधीयते। वैखानसा जना गर्भाष्टमे मासे सीमन्तोन्नयनसंस्कारेण सह तममुं संस्कारं सम्पादयन्ति। वैखानस-स्मार्तसूत्र(३.१३-१५)-क्रियाधिकार(३६.४२)सदृशेषु ग्रन्थेषु तस्य विधानं वर्ण्यते। गर्भरक्षैवास्य संस्कारस्य मुख्यं प्रयोजनम्। संस्कारेऽस्मिन् हवनादिविधानानन्तरं गर्भिण्यै विष्णुचक्रपूरितं पायसम्—

**त्वत्सुतो भाग्यवान् धन्यो गर्भवैष्णवसंज्ञितः ।**
**अप्राकृतो महात्माऽसौ गर्भचक्रेण लाञ्छितः ।।**

---

१. बृहदितिहासतन्त्रागमखण्डे समाविष्टः "वैखानस सम्प्रदाय : सामान्य परिचय" इति शीर्षके निबन्धे डॉ. राघवप्रसादचौधरिणा विषयोऽयं विस्तरेण विवृतो द्रष्टव्यः (पृ. २-८)।

२. चरणव्यूहे वर्णितासु चतसृषु कृष्णयजुर्वेदीयासु प्रधानशाखासु आपस्तम्ब-बौधायना-दिष्वन्तिमा वर्तते औखेया शाखा।

इति मन्त्रोच्चारपूर्वकं पानाय प्रदीयते। संस्कारेऽस्मिन् कृते सति भगवान् विष्णुः स्वयमेव शिशुं शङ्खचक्रादिना लाञ्छयति। यथोच्यते क्रियाधिकारे— "नारायणः स्वयं गर्भे मुद्रां धारयते निजाम्" (३६.४३) इत्यादिना। पाञ्चरात्रागमेषु वर्णितं तप्तमुद्राङ्कनं शीतलमुद्राङ्कनं वा सर्वथा प्रतिषिद्धमत्र। अर्थलोभादज्ञानान्मोहाद्वा तादृशे संस्कारे वृते सति वैखानसः प्रायश्चित्तभाग् भवतीति वर्ण्यते आनन्दसंहिता-(१९.१३-१४)-क्रियाधिकार(३६.३८)सदृशेषु ग्रन्थेषु, "वैखानसस्यास्य न तप्तमुद्रा न मन्त्रदीक्षा न गुरुर्मया विना" (३६.५४) इत्येवं च प्रकरणमेतदुपसंह्रियते।

अर्चकत्वापादनाय क्रियाधिकाराख्ये ग्रन्थे मानसिकी, वाचिकी, शारीरिकी चेति त्रिविधा दीक्षा वर्ण्यते। तत्र भूतशुद्ध्यादिना भाविता मानसिकी, चक्राब्जमण्डले मन्त्रजपादिना साधिता वाचिकी, तप्तचक्रमुद्राङ्कनादिना कृता च कायिकी दीक्षेति संवर्ण्य तृतीयेयं दीक्षा वैखानसैर्नानुमतेति तत्रैव चर्च्यते।

आनन्दसंहितायामितो भिन्नास्त्रिविधा दीक्षा वर्ण्यन्ते। तद्यथा—

**तेषूक्तदीक्षाविधयः पृथगेव प्रकीर्तिताः ॥**

**दीक्षा च त्रिविधा प्रोक्ता सामान्येन तथोच्यते ।**
**विष्णुबल्यग्निना तप्तचक्रेण हविरङ्कितम् ॥**

**यत्प्राश्यते सैव गर्भचक्रदीक्षेत्युदाहृता ।**
**उपनयनाग्निना तप्तचक्रेणाङ्कनमंसयोः ॥**

**या सा बहिस्तप्तचक्रदीक्षेत्येवमुदाहृता ।**
**या चक्रजलजाकारलेखनं तु भुजद्वये ॥**

**सा न्यासचक्रदीक्षा स्याद् दीक्षात्रयमिति स्मृतम् ।**
**औखेयानां गर्भचक्रदीक्षा प्रोक्ता महात्मनाम् ॥**

**बाह्यतप्तादिदीक्षानुसरणं पाञ्चरात्रिणाम् ।**
**उक्ता तथा न्यासचक्रदीक्षा भागवतोचिता ॥**

**एवं दीक्षात्रयं प्रोक्तं वैष्णवानां महात्मनाम् ।** (८.२४-३०)

तप्तमुद्राऽप्यत्र द्विविधा वर्ण्यते—

**पुनश्च तप्तचक्राब्जमुद्रा द्वेधा स्मृता बुधैः ।**
**अन्तस्तापो बहिस्ताप इति तापो द्विधा भवेत् ।।** (८.३०-३१)

अत्र वैखानसानां गार्भचक्रदीक्षाऽन्तस्तापपदेन, पाञ्चरात्राणां च बहिस्तापपदेन परिचीयते।

श्रीवैष्णवा नाथमुनि-यामुनाचार्य-रामानुजाचार्यप्रभृतीनाचार्यान्, द्वादश संख्याकान् आलवाराख्यान् वैष्णवभक्तान्, पाञ्चरात्रागमांश्च बहु मानयन्ति। न तथा मन्यन्ते वैखानसमतानुयायिनः, न च स्वकीयायां गुरुपरम्परामेषां परिगणनमभ्यर्चनं च विधीयते। नापि च ते स्वीयाराधनविधौ तमिलप्रबन्धान् समावेशयन्ति। तमिलभाषाया अपि प्रयोगस्तैर्न क्रियते। केवलं संस्कृतभाषैव पूजाविधौ तैः प्रयुज्यते। यथान्यैराचार्यैर्ब्रह्मसूत्रभाष्यादिमुखेन स्वीयाः सिद्धान्ता मतानि च स्थापितानि, तथैवात्रापि श्रीनिवासमखिना विरचितं लक्ष्मीविशिष्टाद्वैतभाष्यं वैखानससिद्धान्तप्रतिपादकं समुपलभ्यते। विशिष्टाद्वैतपदे समाने राजत्यपि रामानुजीयविशिष्टाद्वैतमताद् भिन्ना एव सिद्धान्ता अत्र प्रतिपादिताः सन्ति, "लक्ष्मीविशिष्टो नारायणोऽद्वैतं यत्र तन्मतं लक्ष्मीविशिष्टाद्वैतम्" इति हि तस्य शब्दस्य व्युत्पत्तिरत्र प्रदर्शिता । दाक्षिणात्येषु नैकेषु वैष्णवमन्दिरेषु वैखानसागमपद्धत्यैव विष्णोर्भगवतो नारायणस्य गृहार्चा-आलयार्चामुखेन प्राधान्येन साकारार्चनं (समूर्तार्चनं) विधीयते। वैदिकमतवदत्र वैदिकपद्धत्यैवाग्नेरपि समाराधनं भवति। ऋषिणा विखनसा न केवलं गृहस्थानां धार्मिककृत्यसम्पादनाय कल्पसूत्रं रचितम्, अपि तु मरीचि-अत्रि-भृगु-कश्यपाख्याश्चत्वारः शिष्या अपि मूर्तिपूजाविधौ सम्यक् शिक्षिताः। अत्र गृहे देवालये चाग्निसमाराधनेन सह मूर्तिपूजाया विधानमपि सम्यक्तया प्रदर्श्यते।

शैवाः पाञ्चरात्रविदश्च प्राय आगमपदेन स्वशास्त्राणि परिचिन्वन्तो वैदिकपद्धतितः स्वीयां पद्धतिं भिन्नामेव मन्वते। न तथा दृश्यते वैखानसागमेषु।

अत एव प्रायस्ते भगवच्छास्त्रपदेन स्वीयान् ग्रन्थान् सम्बोधयन्ति। वैखानसागमानां वैदिकत्वं बौधायनप्रभृतयो धर्मसूत्रकाराः स्वीकुर्वन्ति। "त्रिविधो मखः" (११.२७.७) इति श्रीमद्भागवतवचनं व्याकुर्वता सुबोधिनीकारेण वल्लभाचार्येण वैदिकपदेन वैखानसागमो गृह्यते। भागवतव्याख्याकारेण वीरराघवेणापि तत्पदेन वैखानसागमस्यैव ग्रहणं क्रियते। विष्णुपुराणस्य—

**यज्वभिर्यज्ञपुरुषो वासुदेवश्च सात्वतैः ।**
**वेदान्तवेदिभिर्विष्णुः प्रोच्यते यो नतोऽस्मि तम् ।।** (५.१७.१५)

इति श्लोकस्य व्याख्यानं कुर्वता श्रीनिवासमखिना 'वेदान्तवेदिन्' इति पदस्य वैखानस इत्येवार्थः कृतः। अमूर्ताराधक इति, समूर्ताराधक इति द्विविधौ वैखानसौ तेन वर्णितौ। वेदविहितान् श्रौतान् यागाननुतिष्ठन्नमूर्ताराधक इति, विष्णोर्भगवतो नाराणयस्य मूर्तिमर्चयंश्च समूर्ताराधक इति तेन व्याख्यायते। एतौ निराकाराराधक-साकाराराधकपदाभ्यां परिचीयेते।

## साकार-निराकाराराधनम्

भृगुणा विरचिते खिलाधिकारे साकारं निराकारं चेति द्वौ प्रकारौ समाराधनस्य प्रदर्शितौ। तयोः साकाराराधनं वरमिति स कथयति। समाराधनमेतत् प्रतिमायां भवति। [१]स्थण्डिले, जले, सूर्यमण्डले, हृदये च निराकारमुपासनं क्रियते। सर्वेष्वेतेषु प्राथम्येन मूर्त्याराधनस्य श्रेष्ठता तत्र प्रतिपाद्यते। यतो हि भक्तियोगस्य तत्र समावेशो भवति। यथोक्तं तत्र —

**साकारं च निराकारं भवत्याराधनं द्विधा ।**
**प्रतिमाराधनं श्रेष्ठं साकारमभिधीयते ।।**

---

१. निराकारोपासनायाः स्थानचतुष्टयमत्र निर्दिष्टम् । साकारोपासनापि स्थानचतुष्टयेषु क्रियत इत्यनिरुद्धसंहिताप्रामाण्येन "पाञ्चरात्रागम" इत्याख्ये ग्रन्थे वर्ण्यते (पृ. १२)। तत्रत्या पञ्चमी टिप्पणी च द्रष्टव्या ।

**स्थण्डिले सलिले वापि हृदये सूर्यमण्डले ।**

**आराधनं निराकारं तयोः साकारमुत्तमम्** ।। इत्यादिना।

(खिला. २०.१६-१७)

साकाराराधनस्य श्रेष्ठता यज्ञाधिकार-प्रकीर्णाधिकारादिष्वपि प्रदर्श्यते। मनसः स्थिरतायामेवामूर्ताराधनं कर्तुं शक्यते। कस्यचन स्थूलस्यालम्बनस्याभावे मनसः स्थैर्यं दुःशकमेव। समूर्ताराधने तादृशः क्लेशो नास्ति। अतो वैखानसा अमूर्ताराधनापेक्षया समूर्ताराधनमेव श्रेष्ठतरं मन्वते । तदुक्तं यज्ञाधिकारे—

**तदर्चनं द्विधा प्रोक्तममूर्तं च समूर्तकम् ।**

**अग्नौ हुतममूर्तं स्यात् समूर्तं बेरपूजनम् ।।**

**अमूर्तं यजमानस्य ह्यभावे च विनश्यति ।**

**अच्छिन्नं शाश्वतं नित्यं प्रतिमाराधनं वरम् ।।** इति।

(यज्ञा. १.१०-११)

वैदिकयागादिषु समूर्ताराधने च वैखानसागमीयेऽतीव साम्यमवलोक्यते। गार्हपत्य-आहवनीय-दक्षिणाग्नयस्त्रयो वैदिकयागेषु समाराध्यन्ते। तद्वदेवात्र ध्रुव-कौतुक-उत्सवाख्यास्त्रयो बेराः (मूर्तयः) पूज्यन्ते। गार्हपत्याग्निः स्थानविशेषे स्थाप्यते, न ततः प्रचाल्यते। एवमेव ध्रुवबेरस्यापि भवति निश्चितं स्थानम्। आहवनीयाग्निर्गार्हपत्याग्नितो गृह्यते, तद्वदेव कौतुकबेरस्याधानं ध्रुवबेरतो भवति। उत्सवबेरो दक्षिणाग्नेः प्रातिनिध्यमाधत्ते। अस्य हि विशिष्टेष्ववसरेषु पूजनं विधीयते। एवं च वैदिकाग्निसमाराधनमेव वैखानसे मते समूर्ताराधनरूपेण परिणतमिति वक्तुं शक्यते। अपि च, श्रौतप्रक्रियायां गार्हपत्य-आहवनीय-दक्षिण-सभ्य-आवसथ्याख्याः पञ्चाग्नयोऽपि स्वीक्रियन्ते, तद्वदेवात्रापि विष्णु-पुरुष-सत्य-अच्युत-अनिरुद्धाख्याः पञ्च मूर्तयः, ध्रुव-कौतुक-उत्सव-स्नपन-बलिनामधेयाः पञ्च बेराश्च समाराध्यन्ते। एवमेव दीक्षा-ऋत्विक्-हविष्-त्रिषवण-अवभृथप्रभृतयः शब्दास्तस्मिन्नेवार्थे प्रयुज्यन्ते, यस्मिन्नर्थे हि ते वैदिके वाङ्मये प्रयुक्ताः। एवं च श्रौतयागाराधनमेव वैखानसे मते समूर्ताराधनरूपेण परिणतिं गतमिति वयं बाढं वक्तुं शक्नुमः।

## ऐतिहासिकं विवेचनम्

ऋग्वेद-शुक्लयजुर्वेद-सामब्राह्मण-तैत्तिरीयसंहितासदृशेषु ग्रन्थेषु वैखानसा ऋषयः श्रूयन्ते। सायण-भरतस्वामिप्रभृतिभिर्भाष्यकारैरपि तदनुमन्यते। सीतोपनिषदि च श्रूयते—

**वैखानसमतं तस्मिन्नादौ प्रत्यक्षदर्शनम् ।**
**स्मर्यते मुनिभिर्नित्यं वैखानसमतं परम् ।।** इति।

व्याख्याकारेणोपनिषद्ब्रह्मयोगिना वैखानससूत्राणां निर्देशोऽत्र मन्यते। नारदपरिव्राजकोपनिषदि, आथर्वणीयाश्रमोपनिषदि, बौधायनधर्मसूत्रे, गौतमधर्मसूत्रे, हरदत्ताचार्यविरचिते तद्व्याख्याने, आदिकाव्ये वाल्मीकीये रामायणे, पुराणेषु च विविधेषु वैखानसाः स्मर्यन्ते। तेन प्रतीयते वैखानसः सम्प्रदायोऽयं प्राचीनकालत एव प्रवृत्त आसीत्। अपि च, मनुस्मृतौ—

**पुष्पमूलफलैर्वापि केवलैर्वर्तयेत् सदा ।**
**कालपक्वैः स्वयंशीर्णैर्वैखानसमते स्थितः ।।** (६.२१)

अत्र भाष्यकारेण मेधातिथिना, व्याख्याकारेण कुल्लूकभट्टेन च वैखानसशास्त्रं स्मर्यते । तेनोत्तरभारतीया धर्मशास्त्रिणोऽपि प्राचीनेन मतेनानेन परिचिता आसन्निति निश्चेतुं शक्यते ।

## वैखानसं वाङ्मयम्

भगवतो विष्णोर्ब्रह्मणो वाऽवतारभूतस्य विखनसो मुनेश्चत्वारः शिष्या श्रूयन्ते—भृगु-कश्यप-अत्रि-मरीचिनामानः। तेष्वत्रिणा तन्त्रात्मकाः, भृगुणाऽधिकारात्मकाः, कश्यपेन काण्डात्मकाः, मरीचिना च संहितात्मका वैखानसागमा रचिताः। एते आगमा गद्यरूपाः पद्यरूपाश्च सन्ति। तत्र विमानार्चनकल्पः काश्यपीयं ज्ञानकाण्डं च गद्यरूपम्, समूर्तार्चनाधिकरणं क्रियाधिकारश्चेत्येवमादिका ग्रन्थाश्च पद्यरूपा वर्तन्ते। वैखानसागमेषु चतुर्विधाऽऽगमग्रन्थनामावली दृश्यते। तत्र प्रथमा विमानार्चनकल्पे, द्वितीया च आनन्दसंहितायां वर्तते। द्विविधेयं नामावली मरीचिना प्रस्तुता । तृतीया नामावली भृगुविरचिते यज्ञाधिकारे, चतुर्थी चाऽत्रिग्रन्थे समूर्तार्चनाधिकरणाख्ये

वर्तते। चतुर्विधानामासां नामावलीनां विवरणं समीक्षणं च विधाय डॉ. राघवप्रसादचौधुरिणा सूचितं यत् षष्टिमितास्वेतासु सप्तदशसंहिताः साम्प्रतमुपलभ्यन्ते। एतास्वष्टौ मुद्रिताः, अमुद्रिते च द्वे प्रायः सम्पूर्णाः सन्ति। शिष्टाः सप्त संहिता अपूर्णाः समुपलभ्यन्ते। अयमत्र वर्तते तासां परिचयः—

१. **विमानार्चनकल्पः**— मरीचिना विरचितः, व.र.च. भट्टाचार्य-सेतुमाधवाचार्याभ्यां सम्पादितः, चेन्नपुरी, मद्रास, सन् १९२६ (देवनागरलिप्याम्)।

२. **आनन्दसंहिता**— मरीचिना विरचिता, ईगापालेम (आन्ध्रप्रदेश) इत्यतः सन् १९२४ (तेलुगुलिप्याम्) प्रकाशिता।

३. **आदिसंहिता**— मरीचिना विरचिता, अस्या मातृका तिरुपतिक्षेत्रे श्रीआर. पार्थसारथिभट्टाचार्यसविधे वर्तते।

४. **क्रियाधिकारः**— भृगुणा विरचितः, तिरुमलै-तिरुपतिदेवस्थानम्, तिरुपति, आन्ध्रप्रदेश, सन् १९५३ (देवनागरलिप्यां मुद्रितः)।

५. **खिलाधिकारः**— भृगुणा विरचितः, पूर्ववत्, सन् १९६३ ।

६. **प्रकीर्णाधिकारः**— भृगुणा विरचितः, शैलेन्द्रनाथ एण्ड सन्स, मैलापुरम्, मद्रास, सन् १९२९ (तेलुगुलिप्यां मुद्रितः)।

७. **यज्ञाधिकारः**— भृगुणा विरचितः, डी. डी. रंगाचारी, हिन्दु रत्नाकर प्रेस, मद्रास, सन् १९३० (तेलुगुलिप्यां मुद्रितः)।

८. **अर्चाधिकारः**— मातृका आर. पार्थसारथीसविधे।

९. **वासाधिकारः**— मातृका आर. पार्थसारथीसविधे।

१०. **निरुक्ताधिकारः**— मातृका आर. पार्थसारथीसविधे।

११. **मानाधिकारः**— मातृका आंशिकरूपेणोपलब्धा ।

१२. **चित्राधिकारः**— मातृका आंशिकरूपेणोपलब्धा ।

१३. **वर्णाधिकारः**— मातृका आंशिकरूपेणोपलब्धा ।

१४. **पुरातन्त्रम्**— मातृका आंशिकरूपेणोपलब्धा ।

१५. **समूर्तार्चनाधिकरणम्**— अत्रिविरचितम्, तिरुमलै-तिरुपति देवस्थानम्, तिरुपति, सन् १९४३ (देवनागरलिप्यां मुद्रितम्)।

१६. **ज्ञानकाण्डम्**— कश्यपविरचितम्, आर. पार्थसारथिसम्पादितम्, तिरुमलै-तिरुपति देवस्थानम्, सन् १९६० (देव.लिप्यां मुद्रितम्)।

१७. **भृगुसंहिता**— मातृका, मद्रास गवर्नमेन्ट ओरियण्टल मैन्युस्क्रिप्ट लाइब्रेरी, मद्रास तथा वेंकटेश्वर ओरियन्टल इंस्टीट्यूट, तिरुपति।

**टीका-व्याख्या-पद्धतिग्रन्थाः**

एताभ्य: संहिताभ्योऽतिरिक्ताष्टीका-व्याख्या-पद्धतिग्रन्था अपि केचनोपलभ्यन्ते। तद्यथा—

१. **प्रतिष्ठाविधिदर्पणम्**— नृसिंहवाजपेययाजिना विरचितम्, आर. पार्थसारथिभट्टाचार्येण सम्पादितम्। मद्रास, सन् १९४८ (तेलुगुलिप्यां मुद्रितम्)।

२. **भगवदर्चाप्रकरणम्**— नृसिंहवाजपेयिना विरचितम्।

३. **ब्रह्मोत्सवानुक्रमणिका**— नृसिंहवाजपेयिना विरचिता।

४. **अर्चनानवनीतम्**— केशवाचार्येण विरचितम्।

५. **प्रयोगवृत्तिः**— सुन्दरराजेन विरचिता।

६. **वैखानसगृह्यसूत्र-तात्पर्यचिन्तामणिव्याख्या**— श्रीनिवासमखिना विरचिता, भागद्वयात्मिका, आर. पार्थसारथिना सम्पादिता। तिरुमलै-तिरुपति देवस्थानम्, सन् १९६७; अत्र संजीवयाजिना, वरदराजसूरिणा, भास्करभट्टेन, कोदण्डरामयाजिना च विरचिताष्टीकाग्रन्था: सूच्यन्ते।

७. **वैखानसमहिममञ्जरी**— वैखानसकल्पसूत्रव्याख्या, श्रीनिवासमखिना विरचिता, हिन्दु रत्नाकर प्रेस, मद्रास, सन् १९१३ ।

८. **आनन्दसंहिताटीका**— भट्टारपार्थसारथिना विरचिता, ईगापालेम (आन्ध्रप्रदेश) इत्यत: १९२४ ई. वर्षे प्रकाशिता।

९. **बादरायणसूत्रवृत्तिः**— केशवाचार्येण विरचिता, लक्ष्मी-विशिष्टाद्वैतभाष्यानुसारिणी ।

१०. **कश्यपाज् बुक आफ विज्डम**— हालैण्डदेशीयेन डॉ. तून गान्द्रियान-इत्यनेन आंग्लभाषायामनूदितं काश्यपीयं ज्ञानकाण्डम्, सन् १९६५ ।

इतो भिन्ना अन्येऽपि वैखानसागमीया ग्रन्था निबन्धाश्च डॉ. राघवप्रसादचौधुरिणा निबद्धे बृहदितिहासे समाविष्टे स्वीये "वैखानस सम्प्रदाय : सामान्य परिचय" इत्याख्यस्य निबन्धस्य वैखानसागमग्रन्थसूच्यां परिचायिताः सन्ति। "पाञ्चरात्रागम" इत्याख्यस्य ग्रन्थस्य लेखक एष महानुभावो वैखानसमतसम्बद्धं निबन्धद्वयं ग्रथितवान्। तयोरेकः "भारतीय तन्त्रशास्त्र" इत्याख्ये ग्रन्थे प्राकाश्यमानीतः "वैखानस आगम" (पृ. ४०५-४२२) इत्याख्यः। अपरश्चोपरि सूचितः। तत्र प्रथमे निबन्धे आगमपरिभाषा, त्रिविधा वैष्णवागमाः, दीक्षा, योगः, नाडीचक्रम्, वायवः, मन्त्रविचारः, सावित्रीकल्पः, कुण्डलिनी, मुद्रा—इत्यादयो विषया विवृताः। द्वितीये च निबन्धे वैखानसमतप्रवृत्तिः, सम्प्रदायस्य वर्तमाना स्थितिः, साकारं निराकारं चोपासनम्, वैदिक्यां वैखानसीयायां चाराधनायां साम्यम्, वैखानसा वानप्रस्थाश्च, वैखानसपाञ्चरात्रागमयोः साम्यवैषम्ये, वैखानसागमपरिचयः, टीका-व्याख्यान-पद्धतिग्रन्थानां परिचयः, वैखानसागमसम्मतदर्शनं योगश्च, क्रियाचर्यासम्बद्धा विषयाः—इत्येते विषया व्याख्याताः सन्ति। एवं च द्वयोरेतयोर्निबन्धयोर्वैखानसागमीयाः प्रायः सर्वेऽपि विषयाः समावेशमापुरि-त्येतन्निबन्धद्वयाधारेणैव निबन्ध एष निबद्ध इत्यवधेयम्। विशेषजिज्ञासुभिस्तौ निबन्धौ परिपठनीयौ।

एवमत्र वैखानसमतस्य प्रवृत्तिविषयकं दीक्षाविषयकं च पक्षं समुपस्थाप्य, सामान्यतयाऽस्य श्रुतिसम्मतत्वं च प्रसाध्य, समूर्तराधनं भगवतो नारायणस्य विष्णोः प्राधान्येनात्र वर्ण्यत इति साधितम्, समुपलब्धस्यागमवाङ्मयस्य, टीका-व्याख्या-पद्धतिग्रन्थानां यथोपलब्धं विवरणं च संक्षेपेण प्रदत्तम्। अधुना तत्र प्रतिपाद्यमानानां विषयाणां परिचयो नातिविस्तरेण समुपस्थाप्यते।

आगमाः सर्वे [१]ज्ञान-क्रिया-योग-चर्याख्येषु पादेषु चतुर्षु विभक्ताः सन्तीति जानीमो वयम्। वैखानसागमेष्वपि विनैव पादविभागं प्राचीनपाञ्चरात्रागमवत् सर्वे एते विषया विविच्यन्ते। तत्र दर्शनयोगयोः संक्षेपेण, क्रियाचर्यासम्बद्धानां विषयाणां च विस्तरेण वर्णनं भवतीति तन्त्रागमशास्त्रस्य वैशिष्ट्यमेतत् सर्वत्र दृश्यते। तदधुना वैखानसागमेषु निर्दिष्टा एते विषयाः संक्षेपेण प्रदर्श्यन्ते।

## वैखानसीयं दर्शनम्

विमानार्चनकल्प-खिलाधिकार-आनन्दसंहितासदृशेषु ग्रन्थेषु प्रायो वैखानसीयं दर्शनमुन्मील्यते। कठोपनिषत्-नारायणोपनिषदादिपद्धत्याऽत्र भगवतो नारायणस्य ब्रह्मस्थानीयत्वं प्रतिपाद्यते। "तत्त्वं नारायणः परः" इति श्रुतिवचनं सार्वात्म्येनात्र स्वीक्रियते। अमूर्तं समूर्तं चेति परमतत्त्वस्य द्विविधं रूपमत्राङ्गीक्रियते। तत्रामूर्तस्य तत्त्वस्य स्वरूपमुपनिषत्प्रतिपादितपरब्रह्मस्वरूपतो नैव भिन्नम्। समूर्तं च तस्य स्वरूपं प्रतिमादिषु समाराध्यते। "पद्मकोशप्रतीकाशे महति विश्वस्यायतने नीलतोयदमध्यस्था विद्युल्लेखेव भासुरा नीवारशूकवत् तन्वी वह्निशिखा व्यवस्थिता। तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्म स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्" इत्येवंप्रकारेणोपनिषत्सु महानारायणादिषु (९.१२) वर्णितः परमात्मा एवात्र परब्रह्मपदेन नारायणपदेन वोच्यते। तथैव पुरुषसूक्तादिषु

---

१. "पशुपाशपतिज्ञानं ज्ञानमित्यभिधीयते। षडध्वशुद्धिर्विधिना गुर्वधीना क्रियोच्यते।। वर्णाश्रमप्रयुक्तस्य मयैव विहितस्य च। ममार्चनादिधर्मस्य चर्या चर्येति कथ्यते।। मदुक्तेनैव मार्गेण मय्यवस्थितचेतसः। वृत्त्यन्तरनिरोधो हि योग इत्यभिधीयते।।" (७.२.१०.३१-३३) इत्येवं शिवपुराणे तेषां लक्षणानि दृश्यन्ते, "विवेको यत्र तत्त्वानां कार्यकारणभेदतः। यथावदुचितं वस्तु हेयं चैवोपचर्यते।। विद्यापादः स विज्ञेयः........।।मुद्रामण्डलमन्त्राणां लक्षणं साधकात्मनाम्। आचार्याणां च....क्रियापादः स विज्ञेयः।। यत्रोपायो विरक्तानां षडङ्गः सुमहात्मनाम्।। रागिणामपि भोगार्थं योगपादः स उच्यते। समयाचारसद्वादस्थितिः स्वाम्नायलक्षणः। चर्यापादः समुद्दिष्टः" (२.८-१३) इति च मतङ्गपारमेश्वरे चतुर्णां पादानां विषयाः कीर्त्यन्ते। अत्र ज्ञानं विद्येत्यनर्थान्तरम्। विभिन्नेष्वागमेषु लक्षणानामेतेषां संकरोऽपि दृश्यत इत्यजितागमप्रथमभागसंस्कृतोपोद्घाते (पृ. १०-११) पाण्डिचेरीमुद्रिते प्रदर्शितम्। पाद्मतन्त्रतोऽप्येषां लक्षणानि संग्राह्याणि।

"विश्वतश्चक्षुरुत विश्वतोमुखः" (१०.८१.३) इत्येवमृग्वेदादिषु वर्णितं तत्त्वमेव ना. पू. न्युपनिषदि "नारायणः परं ब्रह्म" (१.४) इति नारायणपदेन स्तूयते।

नारायणाभिधस्यास्य ब्रह्मणोऽमूर्तं समूर्तं चेति द्विविधमाराधनं भवति। यज्ञयागादिषु वह्नौ हविषा क्रियमाणमाराधनं वैखानसागमेष्वमूर्तपदेन, प्रासादादिषु प्रतिमायां क्रियमाणं च समूर्तपदेन प्रोच्यते। पूर्वोक्तं ब्रह्मणः स्वरूपममूर्तमुच्यते, यस्य हि वेदोपनिषदादिषु वैशिष्ट्येन वर्णनं विधीयते। तदपेक्षया भक्तियोगस्य प्राधान्येन प्रतिपादकेष्वागमेषु नारायणस्य भगवतो वासुदेवाभिधं षाड्गुण्यमण्डितं स्वरूपं समूर्त-सगुण-सकलपदाभिधेयम्।

विशुद्धः स्फटिकमणिर्जपाकुसुमाद्युपाधिसंयोगाद् यथा नानाविधरागोपहतो दृश्यते, तथैव निर्गुणो भगवान्नारायणो विष्णुः साकारं स्वरूपं धारयन् मत्स्य-कूर्माद्यवताररूपेणावतरति। यथा हि वैश्वानरो भगवानिन्धनसंयोगेन प्रज्वलति, तथा ध्यानाभ्यासाद्यरणिमथनाभ्यासेन भक्तहृदये, तदनुग्रहाय प्रबुद्धो भगवान् प्रतिमादिषु चाभिव्यक्तिमेति। सम्पूर्णमिदं चराचरात्मकं जगत् तस्यैव मूर्तं स्वरूपम्।

तदेतस्य नारायणाख्यस्य विष्णोः परब्रह्मणः पुरुष-सत्य-अच्युत-अनिरुद्धाख्याश्चतस्रो मूर्तयः प्रादुर्भवन्ति। तदेतासु पुरुषाख्यः परमात्मा सर्वैर्गुणैरन्वितः[१], सत्ये गुणानां त्रयः पादाः, अच्युते द्वौ पादौ, अनिरुद्धे चैक एव पादोऽवतिष्ठते। परमात्मा नारायण एक एव राजते। ब्राह्मणादिवर्णविभागवद् व्याहृतिचतुष्टयविभागवच्च चतस्रो मूर्तय एता गुणाधारेण विभक्ताः सत्योऽपि वस्तुतोऽभिन्ना एव । यथा हि वह्निरेक एवाहवनीय-अन्वाहार्य-गार्हपत्य-आवसथ्याख्येषु कुण्डेषु स्थितश्चतुर्धा भवति, तथैवैता मूर्तयोऽपि यथाक्रमं कान्ति-पुष्टि-सुख-इष्टार्थदायिन्य इति फलभेदाद् भिद्यन्ते। विष्णोरर्चावताररूपेणाप्येता मूर्तयो भिद्यन्ते। विष्णुपुराणे—

**कलाकाष्ठानिमेषादिदिनर्त्वयनहायनैः ।**
**कालस्वरूपो भगवानपापो हरिरव्ययः ।।**

---

१. पाञ्चरात्रागमेषु व्यूहवासुदेवे षण्णामपि गुणानाम्, संकर्षणादिषु यथायथं द्वयोर्द्वयोर्गुणयोः स्थितिः प्रदर्शिता ।

**भूर्लोकोऽथ भुवर्लोकः स्वर्लोको मुनिसत्तम ।**
**महर्जनस्तपः सत्यं सप्त लोका इमे विभुः ।।....**

**ऋचो यजूंषि सामानि तथैवाथर्वणानि वै ।**
**इतिहासोऽथ वेदाश्च वेदान्तेषु तथोक्तयः ।।**
**वेदाङ्गानि समस्तानि मन्वादिगदितानि च ।**
**शास्त्राण्यशेषाण्याख्यानान्यनुवाकाश्च ये क्वचित् ।।**

**काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।**
**शब्दमूर्तिधरस्यैतद् वपुर्विष्णोर्महात्मनः ।।**

(वि. पु. १.२२.७९-८०,८३-८५)

इत्येवं वर्णितः कालस्वरूपः सकलभुवनस्वरूपः शब्दमूर्तिधरश्च भगवान् नारायणो वैखानसागमेष्वपि तथैव वर्ण्यते। एवं चात्र स्वीकृतो भगवान् नारायणो विष्णुर्निर्गुणः सगुणश्चेति, निष्कलः सकलश्चेति, अमूर्तः समूर्तश्चेत्युभाभ्यां स्वरूपाभ्यां राजते। उपनिषदादिवर्णितं निष्कलं निर्गुणं परब्रह्मैव भक्तानुग्रहाय सकलं सगुणं स्वरूपं धारयति। निर्गुणं निर्विकारं तदेतद्ब्रह्म भक्तैर्मन्त्रादिनाऽऽराधितः प्रतिमा-स्थण्डिल-कूर्च-कुम्भादिषु तथैवाऽभिव्यज्यते; यथा हि काष्ठस्थितो वह्निररणिमथनादिना, यथा वा सर्वत्रगो वातो व्यजनादिनाऽभिव्यक्तीभवति। प्रतिमादिषु व्यक्तीभूतश्च स आगमपद्धत्याऽऽराधितो भक्तानां मनोरथान् पूरयति।

श्रीदेवी भगवतो विष्णोः प्रधाना विभूतिः। "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" (श्वे. उ. ४.१०) इत्युपनिषद्वाक्यपद्धत्या श्रीर्मायास्थानीया, भगवान् विष्णुश्च मायीत्वेन वर्ण्यते। एवं च प्रकृतिः [1]पुरुषश्चेति द्वे अपि तत्त्वे अनादी स्वीक्रियेते। तत्र प्रकृतितत्त्वं चेतनाचेतनभेदेन द्विविधम्। पञ्च भूतानि मनो बुद्धिरहङ्कारश्चेत्यष्टौ तत्त्वानि श्रीमद्भगवद्गीतासु (७.४-५) ह्यष्टप्रकृतित्वेन

---

१. "प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम" (१.२१) इति प्रपञ्चसारेऽपि वर्ण्यते। केचन प्रपञ्चसारं वैष्णवतन्त्रेषु परिगणयन्ति।

वर्णितान्यचेतनायां प्रकृतौ समाविशन्ति। चेतना प्रकृतिश्च जीवभूता। प्रकृतिरियं वैखानसागमे शक्तिपदेन श्रीपदेन वा वर्ण्यते।

प्रकृतेरस्याः शक्तिरूपायाः श्रियः साहाय्येनैष भगवान् नारायणः सृष्टिप्रक्रियां प्रारभते। मनुस्मृत्यादिषु पुराणादिषु च वर्णितया पद्धत्या स हिरण्यमयमण्डं समुत्पादयति। वैखानसागमेषु सर्वेषां प्रकृत्यण्डादीनामुपरि स्थितस्य देवैरप्यचिन्त्यस्वरूपस्यानभिलक्ष्यस्य नित्यशुद्धबुद्धमुक्तस्वभावैर्वैष्णवभक्तैरनुभूयमानस्य वैष्णवाण्डस्य स्थितिर्वर्ण्यते। अत्र आमोद-संमोद-प्रमोद-वैकुण्ठाख्याश्चत्वारो लोका उपर्युपरि राजन्ते। तत्र श्रीदेव्या भूषणायुधादिभिश्च परिवृतो भगवान् विष्णुरामोदे, महाविष्णुः प्रमोदे, सदाविष्णुः सम्मोदे, सर्वव्यापी नारायणश्च वैकुण्ठे निवसति। पाञ्चरात्रशैवागमादिपद्धत्या शुद्धेयं सृष्टिरिति वक्तुं शक्यते ।

शुद्धेतरा सृष्टिरत्र सांख्यदर्शनवत् पञ्चविंशतितत्त्वस्वरूपा। विमानार्चनकल्पे सेयं देहोत्पत्तिप्रक्रियाप्रदर्शनपुरस्सरं विस्तरेण वर्णिता। अत्र देहोत्पत्त्यादिकाः सर्वाः प्रक्रिया उपनिषत्सु विभिन्नेष्वागमेषु तन्त्रादिषु च निर्दिष्टा यथायथं साम्य-वैषम्यमुखेन वर्णिताः सन्ति। अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-कल्पना-अक्रोध-शुश्रूषा-शौच-सन्तोष-आस्तिक्य-आर्जवादयः सात्त्विका गुणाः, अहं कर्ता, अहं वक्ता, अहं भोक्ता इत्यादयोऽभिमानप्रधाना राजसाः, निन्दा-आलस्य-मोह-मैथुन-स्तेयादयस्तामसा गुणा अत्र लक्ष्यन्ते ।

**ऊर्ध्वे सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।**
**मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ।।**(का.५४)

इत्येवं सांख्यकारिकायां वर्णितस्त्रिविधः सर्गोऽत्रापि वर्ण्यते। जाग्रत्-स्वप्न-सुषुप्ति-तुरीयाख्याश्चतस्रोऽवस्थाश्च प्राय उपनिषत्सु आगमादिषु च यथा वर्णितास्तथैवात्रापि स्वीक्रियन्ते। पञ्चविंशात्मकः पुरुषो देहश्चात्र सांख्यपद्धत्यैव परिचाय्यते।

देहोत्पत्तिप्रसङ्गेऽत्र देहस्य मानम्, प्राणापानयोर्मानम्, मूलाधारादिस्थानानि, तत्र स्थिता देवताः, नाभिस्थद्वादशारचक्रम्, कुण्डलिनी शक्तिः, हृदयस्थं सूर्यमण्डलम्, नासाग्रस्थं चन्द्रमण्डलम्, तत्र स्थिता मूर्तयः, मुक्तिद्वारम्, हृत्पद्मे भगवतो ध्यानमित्येवमादयो योगशास्त्रसम्बद्धा विषया अप्यत्र विवेचिताः सन्ति ।

सर्व एते विषया भगवतो विष्णोरान्तरबाह्यवरिवस्याभ्यां सम्बद्धा मन्तव्याः। आन्तरवरिवस्या [१]कुण्डलिनीयोगप्रधानेति तत्सम्बद्धा नाडी-चक्र-वायु-प्रभृतयो विषया अपि दार्शनिक्यां समाराधनप्रक्रियायामेव समावेशिताः। एवं दार्शनिक्या भावनाप्रधानया योगपद्धत्या च विश्वव्यापिनस्तेजोभासुरस्य भगवतो विष्णोर्ध्यानावाहनादिनाऽमूर्तं समूर्तं च स्वरूपं भगवतो नारायणस्य समाराध्यते।

देहोत्पत्तिप्रसङ्ग एवात्र नाडीनां वायूनां च स्वरूपमुन्मील्यते। योगपादविवृता अप्येते विषयाः प्रसङ्गवशादत्र वर्ण्यन्ते। तथा हि विमानार्चनकल्पे—इडा-पिङ्गला-सुषुम्ना-सरस्वती-वारुणी-पूषा-हस्तिजिह्वा-यशस्विनी-विश्वोदरा-कुहू-शङ्खिनी-पयस्विनी-अलम्बुषा-गान्धारी—इत्येताश्चतुर्दश नाड्यः प्रधानाः स्वीक्रियन्ते। यद्यपि योगशास्त्रग्रन्थेषु तन्त्रागमग्रन्थेषु च दशैव नाड्यः प्रधाना मताः, तथापि शारदातिलकटीकायां (पृ. ३८-३९) चतुर्दशनाड्यः प्रधाना इत्यपि पक्षोऽङ्गीकृतः। पक्षोऽयं वैखानसागमाभिमत इति वक्तुं शक्यते। पुराणादिष्वपि पक्षोऽयमन्वेषणीयः। एतासां नाडीनां विस्तृतं विवरणं विमानार्चनकल्पे, श्रीराघवप्रसादचौधुरीकृते निबन्धे च द्रष्टव्यम्।

एवमेव दशविधा वायवोऽपि प्राण-अपान-व्यान-उदान-समान-नाग-कूर्म-कृकर-देवदत्त-धनञ्जयाख्या आगम-तन्त्रान्तरवदत्रापि वर्ण्यन्ते। एतेषामपि लक्षणानि तत्रैव द्रष्टव्यानि। योगिनीहृदयाख्ये शाक्ततन्त्रे षोडशविधा वायवः सूच्यन्ते। टीकाकाराश्चात्र— "दशविधा वायवः प्रसिद्धाः, अन्ये षडागमान्तरेषु मृग्याः" (पृ. ३१७) इत्येवं कथयन्ति। तेषु लिङ्गपुराणे (१.८६.८३-८४) चतुर्दशवायूनां नामान्युपलभ्यन्ते। शिष्टं नामद्वयमद्याप्यन्वेषणीयमास्ते।

एवमत्र वैखानससम्मतं परमात्मतत्त्वम्, सृष्टिप्रक्रिया, तत्कारणभूतानि पञ्चविंशतितत्त्वानि, शरीरोत्पत्तिप्रक्रिया, शरीरस्थानि बाह्यान्यान्तराणि चाङ्गानि कुण्डलिनीशक्ति-नाडी-चक्र-वाय्वादीनि चान्तरवरिवस्यासाधनानि विवेचितानि। अधुना वैखानसाभिमतं जीवात्मनः, बन्धमोक्षयोश्च स्वरूपं प्रदर्श्यते ।

---

१. कुण्डलिन्याः स्वरूपं डॉ. राघवप्रसादचौधुरीकृते "वैखानस आगम" इति शीर्षके निबन्धे द्रष्टव्यम् (भारतीय तन्त्रशास्त्र, पृ. ४२१-४२२)। बौद्धतन्त्रेषु चाण्डालीयोगनाम्ना प्रसिद्धः कुण्डलिनीयोगः सर्वेष्वागमतन्त्रग्रन्थेषु योगप्रकरणे नाडी-वायु-चक्र-आधारादिविवरणपुरस्सरं वर्ण्यते ।

आगमेऽस्मिन् जीवात्मा नित्यशुद्धबुद्धनिर्विकारस्वभावः, अणुपरिमाणः सन्नपि सर्वगतः, देहे प्रविश्य शुभाशुभं कर्म सम्पादयति। ऐहिकमामुष्मिकं चेति द्विविधं कर्म। भोजन-आच्छादन-गमन-आसन-शयनादीन्यैहिकानि, अहिंसा-दान-धर्म-परोपकार-भगवदाराधनादीनि चामुष्मिकाणि कर्माणि भवन्ति। स्वकर्मवशाज्जीवः संसरति, एतैर्निवृत्तश्च मोक्षपदवीमाप्नोति। जरायुज-अण्डज-स्वेदज-उद्भिज्जादिभेदभिन्ना जीवा नानायोनिषु प्रविश्य स्वकर्मफलानि भुञ्जते। भगवदाराधनेन मायामुक्ताश्च ते नारायणप्रसादेनापुनरावृत्तिलक्षणां मुक्तिमासाद्य कृतकृत्या भवन्ति। सालोक्य-सामीप्य-सारूप्य-सायुज्यलक्षणश्चतुर्विधो मोक्षपथोऽत्र वर्णितः। पुराणादिष्वप्येते भेदा विस्तरेण वर्णिता उपलभ्यन्ते। इयांस्तु विशेषः— सालोक्ये आमोदस्य, सामीप्ये प्रमोदस्य, सारूप्ये सम्मोदस्य, सायुज्ये च वैकुण्ठस्य प्राप्तिर्भवतीति मरीचिना प्रतिपाद्यते, नारायणसमाराधनेनैष चतुर्विधो मोक्षोऽधिगम्यत इति च।

भगवदाराधनं जप-हुत-अर्चन-ध्यानभेदेन चतुर्विधम्। भगवद्ध्यानपूर्वकं सावित्री-अष्टाक्षरमन्त्रादीनां निरन्तरमभ्यासो जपपदेन, अग्निहोत्रादीनां समाचरणं हुतपदेन, गृहे देवालये वा वैदिकागमिकपद्धत्या प्रतिमादिसमाराधनमर्चनपदेन, अष्टाङ्गयोगपद्धत्या जीवात्मपरमात्मनोरेकीभावचिन्तनं च ध्यानपदेन प्रोच्यते। चतुर्विधेनाराधनेन प्रीतो भगवान् साधकाय यथायथं चतुर्विधां मुक्तिं प्रददाति।

एवमत्र संक्षेपेण वैखानसीयं दर्शनं विवेचितम्। अधुना वैखानसागमसम्मतस्य योगस्य स्वरूपं प्रदर्श्यते।

## वैखानसीयो योगः

विमानार्चनकल्पे मरीचिना— "जीवात्मपरमात्मनोर्योगो योग इत्यामनन्ति" इत्येवं योगस्य लक्षणं निर्दिष्टम्। योगस्य लक्षणमेतत् पतञ्जलिना प्रदर्शितात् "योगश्चित्तवृत्तिनिरोधः" इति लक्षणात् सर्वथा भिन्नमेव, तथापि पुराणतन्त्रागमादिषु मरीचिप्रदर्शितं लक्षणमेव सर्वत्र मान्यते। भक्तेः प्राधान्याङ्गीकारेणैव लक्षणस्यैतस्य पार्थक्यं व्यक्तीभवति ।

एवमत्र योगलक्षणे पार्थक्ये जागरूके सत्यपि योगाङ्गानामष्टानां स्वीकारः पातञ्जलयोगपद्धत्यैव क्रियते। एतेषां विवरणे नूनं वैभिन्न्यं वर्तते। तथाहि— पातञ्जले योगे यमानां नियमानां च पञ्च पञ्च भेदाः सन्ति, अत्र तु दश दश

भेदास्तयोर्निरूपिताः, एतैर्विंशतिगुणैरुपेत एष पुरुषो योगेऽधिकृतो भवतीति च प्रोक्तम्। एते च भेदाः पाशुपते मते पुराणेषु च केषुचिद् वैखानसपद्धत्यैव वर्ण्यन्ते। योगस्य तृतीयस्याङ्गस्य आसनस्य ब्राह्म-स्वस्तिक-पद्म-गोमुख-सिंहमुख-मुक्तासन-वीरासन-भद्रासन-मयूरासनाख्या नव भेदा मरीचिना विस्तरेण स्वीये विमानार्चनकल्पाख्ये ग्रन्थे वर्णिताः, एतेषु च यथाक्रमं त्रयाणां त्रयाणामासनानामुत्तममध्यमाधमविभागः कृतः। प्राणायामस्यात्रापि रेचक-पूरक-कुम्भकाख्यास्त्रय एव भेदा वर्ण्यन्ते।

प्रत्याहारस्य पञ्चभेदाः सन्ति। तद्यथा— १. विषयेभ्य इन्द्रियाणां बलादाहरणम्, २. सर्वस्य जगतः स्वात्मवद् दर्शनम्, ३. शास्त्रविहितानां कर्मणामेकाग्रतया सम्पादनम्, ४. पादाङ्गुष्ठान्मूर्धपर्यन्तं स्थितेष्वष्टादशमर्मस्थलेषु वायोरारोपणं धारणमूर्ध्वक्रमेणाधःक्रमेण समाकर्षणं च, ५. नाडीमार्गे वायूनामारोपणं निरोधनं चेति। मरीचिनाऽत्र निर्दिष्टानामष्टादशमर्मस्थानानां नामानि तेषां प्रमाणानि च वर्णितानि सन्ति।

धारणाया अप्यष्टौ प्रकारा अत्र वर्ण्यन्ते। यमादिगुणयुक्तस्य मनस आत्मनि नियोजनं प्रथमा धारणा, हृदयाकाशे बाह्याकाशे च मनसो धारणं द्वितीया धारणा, पृथिव्यादिपञ्चभूतेषु तदधिपतीनां धारणेन पञ्चविधा धारणा भवन्ति। दहराकाशे परमात्मनः परमानन्दमयस्य विग्रहस्य धारणमन्तिमाऽष्टमी धारणेति। एतासु पञ्च भूतान्याश्रित्य कृतानां पञ्चविधधारणानां वर्णनं विस्तरेण विद्यते। प्रायः सर्वेष्वेवागमधृतयोगप्रतिपादकग्रन्थेष्वेतासां धारणानां वर्णनं विस्तरेण कृतं द्रष्टव्यं जिज्ञासुभिः।

जीवात्मना कृतं परमात्मनश्चिन्तनमेवात्र ध्यानपदेन प्रोच्यते। निष्कलं सकलं चेति द्विविधं तद्भवति। अनयोर्निष्कलं ध्यानं देवैरप्यनभिलक्ष्यम्। सकलं च ध्यानं निर्गुणसगुणभेदेन भिद्यते। निर्गुणं निष्कलस्वभावम्। अत्र परमात्मनोऽतिरिक्तं किमपि नास्ति। परमात्मा हि काष्ठे वह्निरिव सर्वत्र व्याप्तो विद्यते। स आकाश इव आत्मगुहां प्रविष्टो नित्योऽचिन्त्यो निष्कलरूपेण राजते। प्राणायाम-प्रत्याहार-धारणाभ्यासेन स्वात्मानं संस्कृत्य जीवात्मा निष्कलं परमात्मानमनेन निर्गुणेन ध्यानेन साक्षात्कर्तुं प्रभवति। "नारायणः परं ज्योतिरात्मा नारायणः परः" श्रुतिरियं निर्गुणं परमात्मानमेव स्तौति। "ऊर्ध्वकेशं विरूपाक्षं पुरुषं कृष्णपिङ्गलम्" (महानारा. उ. १०.१०) इत्यत्र चान्य एव प्रकारो निर्गुणध्यानस्य। एवमेव सगुणध्यानस्यापि चत्वारः प्रकारा वर्णिता मरीचिना। ते तत एव द्रष्टव्याः।

अष्टाङ्गयोगस्यान्तिममङ्गं वर्तते समाधिर्नाम। जीवात्मनः परमात्मना साम्यमेवात्र समाधिपदेन प्रोच्यते। आदित्यकिरणस्पर्शेन यथोपल उष्णतां धत्ते, तद्वत् परमात्मनो दर्शनेन प्रत्यगात्मा नित्यशुद्धबुद्धमुक्तस्वभावो भवति, परमानन्दमनुभवंश्च परमात्मानं नारायणं साक्षात्करोति। एतादृशो जीवात्मा जीवन्मुक्त इत्यभिधीयते। जीवन्मुक्तः साधकोऽन्ते योगपद्धत्या देहत्यागं करोति। कुण्डलिनीयोगप्रधाना योगप्रक्रिया पूर्वं व्याकृतैव।

## क्रियाचर्यापक्षौ

एवमत्र योगस्याष्टावङ्गानि विवेचितानि। विवरणेनानेन ज्ञायते यन्नामसंख्यासाम्येऽपि लक्षणे भेदोपभेदादिष्वपि चात्र वर्तते वैलक्षण्यमिति। आगमेषु दर्शनं योगश्चेति द्वौ विषयौ संक्षेपेण, क्रियाचर्यापक्षौ च विस्तरेण प्रदर्श्येते इति पूर्वमुक्तम्। तद्वद् वैखानसागमेष्वपि दृश्यते। प्रतिसम्प्रदायं क्रियाचर्यापक्षौ भिद्येते। देवालयनिर्माणं मूर्तिकल्पनं भगवदाराधनार्थं पात्रादिकल्पनमित्येवमादिका वास्तुशास्त्र-शिल्पशास्त्र-सम्बद्धा विषयाः, तालमानाङ्गुलिमानादयः, उपादानद्रव्याणि, प्रतिमादिनिर्माण-विधयश्चेत्येवमादिकाः क्रियापादसम्बद्धाः, नित्यार्चन-नैमित्तिकार्चनादीनां पर्वोत्सवादीनां प्रायश्चित्तादीनामङ्कुरार्पणादीनां विधयश्च चर्यापादीया विषया अतीव विस्तरेण सर्वेष्वेवागमेषु वर्ण्यन्ते। तद्वत् ते सर्वे विषया अत्रापि वर्णिताः सन्तीति विस्तरभिया नात्र ते चर्च्यन्ते।

## सारसंक्षेपः

अयमत्र संग्रहः— वैखानसश्रौतसूत्रादयः केचन संहिताग्रन्थाश्च वैखानसागमस्य प्रकाशिता उपलभ्यन्ते। प्राधान्येन तिरुपतिनगरतस्तेषां प्रकाशनं सञ्जातम्। विभिन्नासु संहितासु षष्टिपरिमितानां संहिताग्रन्थानां नामावली दृश्यते। एतेषु सप्तदशग्रन्थाः साम्प्रतमुपलभ्यन्ते। तत्राष्टौ मुद्रिताः। अमुद्रितावपि द्वौ सम्पूर्णौ। अन्ये सप्त ग्रन्था आंशिकरूपेणावशिष्टाः सन्ति। अत्र वैदिकं वाङ्मयं प्रति भूयानादरः। नारायण-पुरुष-सत्य-अच्युत-अनिरुद्धाख्यरूपेण भगवानत्रार्च्यते। तत्र नारायण आदिमूर्तिपदेन, पुरुषादयश्च चतुर्मूर्तिपदेनाभिधीयन्ते। पञ्चमूर्तय एताः पञ्चवीरपदेनाप्युच्यन्ते। वैखानसाः पद्मकोशप्रतीकाशे महति विश्वस्यायतने हृदये प्रज्ज्वलद्वैश्वानरशिखामध्यस्थं परमात्मानं नारायणापराभिधं श्रीविष्णुमेवाक्षरं ब्रह्मेति

विदु:। तदेतद् ब्रह्म निष्कलेन सकलेन च स्वरूपेण राजते। अमूर्तं समूर्तं चेति द्विविधं तस्य समाराधनं भवति। श्रीश्च भवति तस्य शक्ति:। सा च नित्या आद्यन्तरहिताऽव्यक्तरूपिणी, विष्णो: संकल्पाच्च प्रवर्तते। योगेन क्रियया चर्यया च भगवत आन्तरं बाह्यं च समाराधनं भक्तैस्तदनुग्रहाय क्रियत इति।

●

# पाञ्चरात्रागमः

## पाञ्चरात्रशास्त्रस्य प्राचीनता

छान्दोग्योपनिषदि (७.१.३) श्रुता एकायनविद्या। पाञ्चरात्रश्रुतिः शब्देनानेन बोध्यत इति निर्विवादं स्वीक्रियते। एकायनश्रुतिमधीयाना औपगायन-कौशिक-शाण्डिल्य-भरद्वाज-मौञ्जानयाख्याः पञ्च आचार्याः शास्त्रमेनं प्रवर्तयामासुः[१]। काण्वशाखामहिमसंग्रहकारेण नागेशेन[२] पाण्डुरङ्गपुरवास्तव्येन शुक्लयजुर्वेदीया काण्वशाखैवेयमिति प्रतिपाद्यते। "काण्वीं शाखामधीयानावौपगायनकौशिकौ। प्रपत्तिशास्त्रनिष्णातौ" (१.१०९) इति वदन्ती जयाख्यसंहिता तमिमं विषयं पोषयति[३]। डॉ. हेमचन्द्ररायचौधरी, डॉ. आर. जी. भाण्डारकर-प्रभृतिभिश्छान्दोग्योपनिषत्-पाणिनिसूत्र-पातञ्जलमहाभाष्य-शिलाशासनादिप्रामाण्येनास्य शास्त्रस्य प्राचीनत्वं साधितम्। वेदान्तसूत्रे तर्कपादे पाञ्चरात्रमतं समालोच्यते। भगवद्गीता पाञ्चरात्रसम्मतं प्रपत्तिसिद्धान्तं मानयति। [४]नारायणीयोपाख्याने

---

१. "काण्वीं शाखामधीयानावौपगायनकौशिकौ। शाण्डिल्यश्च भरद्वाजो मुनिर्मौञ्जायनस्तथा॥ इमौ च पञ्चगोत्रस्था मुख्याः काण्वीमुपाश्रिताः।" (पृ. १५) इति जयाख्यायामधिके पाठे दृश्यते। ईश्वरसंहितायां तु—"पुरा तोताद्रिशिखरे शाण्डिल्योऽपि महामुनिः॥....सुमन्तुं जैमिनिं चैव भृगुं चैवौपगायनम्। मौञ्जायनं च तं वेदं सम्यगध्यापयद् मुदा।... एष एकायनो वेदः प्रख्यातः सर्वतो भुवि॥" (१.३८,४१-४३) इत्युच्यते।

२. "इयं शुक्लयजुःशाखा प्रथमेत्यभिधीयते। मूलशाखेति चाप्युक्ता तथा चैकायनीति च॥" इति। मद्रासराजकीयग्रन्थालयसूची (पृ. ३३००) द्रष्टव्या। अस्या मातृकायाः संख्या २३८९ वर्तते।

३. "अर्ली हिस्ट्री आफ दि वैष्णव सेक्ट" इत्याख्ये, "वैष्णविज्म, शैविज्म एण्ड अदर माइनर रिलीजियस सिस्टम्स" इत्याख्ये च ग्रन्थे क्रमशो द्रष्टव्यमेतत्।

४. नारायणीयोपाख्याने सर्वप्रथमं डॉ. जी. ए. ग्रियर्सनमहोदयेन १९०८ ई. वर्षे निबन्धो लिखित इति डॉ. जे. गोण्डामहोदयः सूचयति "मिडीवल रिलीजियस लिटरेचर" (पृ. ६, टि. २६) इत्यत्र।

महाभारतीये वर्ण्यते पाञ्चरात्रमहिमा। उत्पलवैष्णवकृतायां स्पन्दप्रदीपिकायां पाञ्चरात्रश्रुति-पाञ्चरात्रोपनिषत्-कालपरा-चिच्छक्तिसंस्तुति-जयाख्यसंहिता-जाबालिसूत्र-ज्ञानसम्बोध-नारदसंग्रह-बौधायनसंहिता-मायावामनसंहिता-मायावैभवागम-लक्ष्मीसंहिता-विश्वसंहिता-विष्णुयामल-वैहायसीसंहिता-षाड्गुण्यविवेक-सङ्कर्षणसूत्र-सात्वतसंहिता-सदृशाश्चागमग्रन्था[१] उद्धृता विद्यन्ते। सर्वैरेतैः प्रमाणैः पाञ्चरात्रशास्त्रस्य[२] प्राचीनत्वं सुतरां सिद्ध्यति।

## पाञ्चरात्रपदप्रवृत्तिनिमित्तम्

पाञ्चरात्रपदप्रवृत्तिनिमित्तविषये[३] तेषु तेषु ग्रन्थेषु प्राचीनेष्वर्वाचीनेषु च विविधा व्युत्पत्तयो वर्णिता विद्यन्ते। [४]अभिगमनम्, उपादानम्, इज्या, स्वाध्यायः, योग इति पञ्चानां भगवत्कैङ्कर्यरूपाणां कर्मणां प्रत्यहमनुष्ठानार्थं प्रतिनियताः पञ्चकालाः शास्त्रेऽस्मिन् यतः सन्ति संविभक्ताः, अतः पञ्चरात्राह्वयमिदं शास्त्रमिति मन्तव्यम्। "तैरिष्टः पञ्चकालज्ञैर्हरिरेकान्तिभिर्नरैः" (१२.३३६.४६), "तत्रापि पञ्चभिर्यज्ञैः पञ्चकालानरिन्दम" (१२.३३७.३०) इत्येवं नारायणीयेऽपि स्मर्यन्ते पञ्चकालाः पञ्चयज्ञाश्चेमे। श्रूयते च शतपथब्राह्मणे (१३.६.१) पाञ्चरात्रसत्रम्। वैदिके वाङ्मये रात्रिशब्दो वर्ततेऽहोरात्रस्य वाचकः। तदनुसारं

---

१. सर्वेषामेषां ग्रन्थानां परिचयोऽस्मदीये लुप्तागमसंग्रहद्वितीयभागस्य उपोद्घातेऽकारादिक्रमेण प्रदत्त इति तत एव द्रष्टव्यम्।

२. पाञ्चरात्रशास्त्रस्य प्राचीनतासाधकानि प्रमाणानि प्राय एतद्विषयकेषु सर्वेषु ग्रन्थेषु प्रदर्श्यन्ते। तानीमानि "पाञ्चरात्रागम" इत्याख्ये ग्रन्थे (पृ. १२-१६) शिलाशासन-महाभारतादिसंस्कृततमिलसाहित्याधारेण प्रदर्शितानि। एवमेव डॉ. अशोककुमार-कालियाकृते निबन्धेऽपि द्रष्टुं शक्यन्ते। विषयेऽस्मिन् चतुर्थस्य ई. पू. द्वितीयशताब्दीयस्य यज्ञसूरिसातकर्णिशिलालेखस्य आन्ध्रप्रदेशे कृष्णाजनपदे समुपलब्धस्य सूचना स्वीये निबन्धे श्रीमता डॉ. सम्पत्कुमारेण प्रदत्ता।

३. विषयेऽस्मिन् जयाख्यसंहिताभूमिका (पृ. १६-२६, ५४-६७), डॉ. श्रादर-(पृ. २४-२६), डॉ. कालिया (पृ. ३९-४२)- डॉ. चौधरी (पृ. १६-२१) ग्रन्था अपि द्रष्टव्याः।

४. अभिगमनादीनां विशिष्टं विवरणं डॉ. चौधरीग्रन्थे (पृ. ३२१-३४७) द्रष्टव्यम्। सप्तविधस्नानादयोऽन्येऽपि विषया अत्र विवृताः।

पाञ्चरात्रसत्रमिदं पञ्चभिरहोरात्रैः[१] सम्पादनीयं स्यात्। अत्र चैकमेवाहोरात्रं पञ्चसु कालेषु विभज्य तत्र भगवानिज्यते। कालसंकोचेऽस्मिन् किं कारणमिति न जानीमः। पाञ्चरात्रसंज्ञाप्रवृत्तिनिमित्तं त्वत्रैव निहितमिति वयं भणामः। "पञ्चकालरतश्चैव पञ्चरात्रार्थवित् तथा" (१६.९) इति जयाख्यवचने पञ्चकालपञ्चरात्रपदयोः पृथङ्निर्देशान्नैतत् सम्भवतीति पाञ्चरात्ररक्षासम्पादकः श्रीदुरैस्वामिमहोदयः स्वकीये संस्कृतोपोद्घाते (पृ. ३९) प्रतिपादयति। तत्र विचारचारु, पञ्चरात्रार्थविदेव पञ्चकालरतो भवतीत्येतत्प्रदर्शनाय तत्रोभयोरेतयोः पदयोः प्रयोगस्य सार्थक्यात्, पञ्चरात्रशास्त्रं जानाति तदनुरूपमाचरतीति जयाख्यवचनस्याभिप्रायत्वात्। [२]डॉ. श्रादरमहोदयस्तु पर-व्यूह-विभवादीनां पञ्च-स्वरूपाणां प्रतिपादकत्वादिदं शास्त्रं पाञ्चरात्राभिधया प्रथितमिति प्रतीयत इत्याह । तन्न, सात्वतसंहितायां पर-व्यूह-विभवाख्यस्य परब्रह्मणो रूपत्रयस्यैव प्रतिपादनदर्शनात् ।

## पाञ्चरात्रीयं वाङ्मयम्[३]

सात्वतं पौष्करं जयाख्यं चेति संहितात्रयं पाञ्चरात्रागमेषु रत्नत्रयनाम्ना प्रसिद्ध्यति। "ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः। अर्चनीयश्च सेव्यश्च कीर्तनीयश्च सर्वदा ।। सात्वतं विधिमास्थाय गीतः सङ्कर्षणेन यः। द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ।।" (६६.३९-४०) इति महाभारतभीष्मपर्ववचने सात्वतसंहिता स्मर्यत इति तत्सम्पादकः श्रीमान् अनन्ताचार्यः कथयति। डॉ. श्रादरमहोदयस्तत्राङ्गीकरोति[४]। "द्वापरवेलायाम्" (१.७१), "द्वापरसन्ध्यंशे" (१.७३), "प्राप्तं सङ्कर्षणात्" (२.४) इत्यहिर्बुध्न्यसंहितावचनैस्तत्राप्येतद् महाभारतवचनं सङ्गमयितुं शक्यत इति स वदति। अपि च, सङ्कर्षणसंहिताऽपि स्वतन्त्रा समुपलभ्यते, या हि वेदान्तदेशिकेन पाञ्चरात्ररक्षायां (पृ. ११५)

१. "दिनपञ्चकपर्यन्तं शैवानां न विलोकनम्" (१.८.३) इत्येवं शक्तिसंगमतन्त्रे प्रदत्तं पाञ्चरात्रलक्षणमप्येतदनुगुणम् ।

२. "इण्ट्रोडक्शन टू दि पाञ्चरात्र एण्ड अहिर्बुध्न्यसंहिता" इत्याख्यस्तस्य ग्रन्थो द्रष्टव्यः (पृ. २५-२६) ।

३. पाञ्चरात्रशास्त्रं तस्य भेदोपभेदाश्चेति विषयः "पञ्चरात्रागम" इत्याख्ये ग्रन्थेऽपि द्रष्टव्यः (पृ. २१-२९) ।

४. इण्ट्रोडक्शन० इत्याख्यस्तस्य ग्रन्थो द्रष्टव्यः (पृ. १५-१६) ।

स्मृतेति। अत्रोच्यते—सात्वतसंहिता हि हलिना प्रार्थितेन भगवता चक्रपाणिना साक्षात् तस्मै समुपदिष्टा, तेन सा लोके प्रचारितेत्यस्या एव प्राधान्यं मन्तव्यम्। अहिर्बुध्न्यसंहिता तु न भगवता साक्षादुपदिष्टा, अपि तु संकर्षणादहिर्बुध्न्येनोपलब्धा। अत्र (५.५९) सात्वतसंहिता स्मर्यत इति हि स्वयमेव स्वीकरोति डॉ. श्रादरमहोदयः[१]। सात्वतविधीनां सर्वाङ्गपूर्णं संक्षिप्तं च[२] विवेचनं सात्वतसंहितायां विहितम्। तेनापि तस्या एव प्राचीनत्वं वैशिष्ट्यं चापि ख्याप्यते।

सात्वतायां (९.१३३) पौष्करं वाराहं प्राजापत्यं (ब्राह्मं) चेति संहितात्रयं [३]स्मर्यत इत्यपि न साधु, अयं हि तत्रत्यः पाठः— "यः स्थितस्त्रिविधे सर्गे विभवः पारमेश्वरः। पौष्कराख्ये च वाराहे प्राजापत्ये महामते॥"[४] इति। एवं चात्र त्रिविधः सर्गः प्रतिपादितः, न संहितात्रयम्। एष त्रिविधः सर्गो भागवतोद्धरणपुरस्सरं व्याख्यातो भाष्यकारेणालशिङ्गभट्टेन (पृ.१९८-१९९)। तथा च प्राचीनसंहिता-कालक्रमनिर्धारणवेलायां[५] स्थापितमेतन्नामत्रयमलीकप्रायमिति सात्वतसंहितैव प्राचीनतमा सिद्ध्यति।

रत्नत्रयनाम्ना प्रसिद्धासु संहितासु सात्वतं पौष्करं जयाख्यं चेति क्रमः संदृश्यते। [६]यादवाचले सात्वतविधिना, श्रीरङ्गे पौष्करपद्धत्या, हस्तिशैले च जयाख्यानुसारं हरिः सम्पूज्यत इति स्थानभेदेन सर्वासामासामप्रतिहतं समानं च प्रामाण्यम्। कालपर्ययात् सात्वतनिष्ठैरीश्वरसंहिता, पौष्करनिष्ठैः पारमेश्वरसंहिता, जयानिष्ठैश्च पाद्मसंहिता सबहुमानमादृता। लक्ष्मीतन्त्रमहिर्बुध्न्यसंहिता च

---

१. इण्ट्रोडक्शन.....पृ. २०।

२. "सर्वसंहितासारभूते श्रीसात्वते" (पृ. ४३), "भगवच्छास्त्रसारभूते" (पृ. ७९) इति सच्चरित्ररक्षायां वेदान्तदेशिकाचार्यः प्रतिपादयति।

३. इण्ट्रोडक्शन....(पृ.२०), डॉ. एच. डेनियलस्मिथमहोदयोऽप्येवमेवाह (ए डिस्क्रिप्टिव बिब्लिओग्राफी आफ़ दि पाञ्चरात्रागम, भा. १, पृ. ५३५)।

४. सात्वतसंहिता (९. १३२-१३३) तत्रत्यं भाष्यं च द्रष्टव्यम्।

५. इण्ट्रोडक्शन...., पृ. २०।

६. तथा चेश्वरसंहितायाम्— "एतत्तन्त्रत्रयोक्तेन विधिना यादवाचले। श्रीरङ्गे हस्तिशैले च क्रमात् सम्पूज्यते हरिः॥" (१.६७) इति।

सात्वतोपबृंहकतया[१] स्वीक्रियेते। पाञ्चरात्रसंहितासु [२]पञ्चरत्न-नवरत्नादिविभागोऽपि दृश्यते। तत्र परमसंहिता मुख्या श्रीभाष्यकारेण रामानुजेन श्रीभाष्ये (२.२.४२) सादरं स्मर्यते। यामुनाचार्य-रामानुज-वेदान्तदेशिकादिस्मृतानाम्, तासु तासु पाञ्चरात्रसंहितासु चर्चितानां च त्रिशतप्रायाणां संहितानां परिचयो वैशद्येन भारतीयैः पाश्चात्त्यैश्च विद्वद्भिर्विहितः[३]।

## पाञ्चरात्रीयं दर्शनम्

जयाख्यसंहितायाम्, अहिर्बुध्न्यसंहितायाम्, लक्ष्मीतन्त्रे च ग्रन्थारम्भे पाञ्चरात्रदर्शनं व्याक्रियते। पाद्मसंहितायां (तन्त्रे) पृथगेव ज्ञानपादस्य सत्ता राजते। तत्र [४]जयाख्यसंहितायामहिर्बुध्न्यसंहितायां च विवेचितं दर्शनं डॉ. सुरेन्द्रनाथदास-गुप्तरचिते "भारतीय दर्शन का इतिहास" इति शीर्षके ग्रन्थे तृतीये भागे (पृ. १२-५७) सामान्यरूपेण, अहिर्बुध्न्यसंहिताप्रदर्शितं दर्शनं च डॉ. ओटो-श्रादरकृते तत्संहिताया उपोद्घाते (पृ. २७-९३) विशेषेण द्रष्टुं शक्यते। लक्ष्मीतन्त्रनिर्दिष्टं च दर्शनं डॉ. अशोककुमारकालियाकृते "लक्ष्मीतन्त्र : धर्म और दर्शन" इत्याख्ये ग्रन्थे (पृ. ६१-१७८) विस्तरेण वर्ण्यते। पाद्मसंहितादिषु वर्णितस्य दर्शनस्य स्वरूपं डॉ. राघवप्रसादचौधरीग्रथिते "पाञ्चरात्रागम" इत्याख्ये ग्रन्थे (पृ. ३७-६२) द्रष्टव्यम्। सात्वतसंहितायां तु दर्शनप्रक्रियाप्रदर्शकानि स्थलानि यत्र तत्र विप्रकीर्णानि सन्ति । तानि संगृह्य तत्रत्यं दर्शनं तस्याः संहिताया

---

१. सात्वतसंहिताया अलशिङ्गविरचितं भाष्यं द्रष्टव्यम् (पृ. ७१, १२८, १५२, २५५)।

२. "संस्कृत साहित्य का बृहत् इतिहास" इत्याख्यस्य ग्रन्थस्य तन्त्रागमाख्ये खण्डे प्रकाशितो डॉ. अशोककुमारकालियानिबद्धः "पाञ्चरात्र परम्परा और साहित्य" इति शीर्षको निबन्धो द्रष्टव्यः (पृ. ९९-१००)। मतान्तरसमालोचनमप्यत्रैव विलोकनीयम्।

३. श्रीआसुरीश्रीनिवास-आय्यंगारमहोदयस्य वैयक्तिके सङ्कलने पूर्णा अपूर्णाश्च पाञ्चरात्रागमीया २४४ संख्याका ग्रन्थाः समुपलभ्यन्ते—इति पाञ्चरात्रागमे (पृ. ३) सूच्यते। नामानि तत्र न दृश्यन्ते। अनिरुद्धसंहिताभूमिकायां (पृ.३) चानेनैव विदुषा २७५ संख्या संहितानां निर्दिष्टा।

४. जयाख्यसंहिताभूमिकाऽप्यत्र द्रष्टव्या। डॉ. राघवप्रसादचौधुरीनिबद्धे "पाञ्चरात्रागम" इत्याख्ये ग्रन्थे नानासंहिताधारेण प्रधानतः पाद्मसंहिताधारेण विवेचितं पाञ्चरात्रीयं दर्शनं (पृ. ३७-६२) द्रष्टव्यम्।

उपोद्घाते (पृ. १८-४३), "आगममीमांसा" इत्याख्ये ग्रन्थे (पृ. १२-२२) चास्माभिर्विवेचितमिति तत्र तत्र सर्वमेतद् द्रष्टुं शक्यते।

इदं चात्र विशेषतोऽवधातव्यम्— "त्रिविधेन प्रकारेण परमं ब्रह्म शाश्वतम्। आराधयन्ति ये तेषां रागस्तिष्ठति दूरतः॥" (१.२३) इति परब्रह्मणस्त्रिविधां सत्तां संसूच्य— "षाड्गुण्यविग्रहं देवं भास्वज्ज्वलनतेजसम्। सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ॥ परमेतत् समाख्यातमेकं सर्वाश्रयं प्रभुम्।" (१.२५-२६) इत्येवं परब्रह्मणः स्वरूपं सात्वतायां वर्णितम्। तदनु — "एतत्पूर्वं त्रयं चान्यज्ज्ञानाद्यैर्भेदितं गुणैः॥ विद्धि तद् व्यूहसंज्ञं सन्निःश्रेयसफलप्रदम्।" (१.२६-२७) इत्येवं वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धाख्यस्य व्यूहचतुष्टयस्य स्वरूपं निरूप्य, "गुणानुवृत्तिभेदेन युक्तं ज्ञानादिकैर्गुणैः। नानाकृतिं च तद्विद्धि वैभवं भुक्तिमुक्तिदम्॥" (१.२७) इति विभवस्वरूपं च व्याख्यातम् ।

अत्र पराशरभट्टपादा विष्णुसहस्रनामभाष्येऽमुमेव ग्रन्थं व्याकुर्वन्त एवमाहुः — "परव्यूहविभवात्मना त्रिविधं परब्रह्मेति भागवतसिद्धान्तः। तत्र परं नामाकार्यं कार्यादनवच्छिन्नपूर्णषाड्गुण्यमहार्णवोत्कलिकैकातपत्रीकृतनिस्समनित्यभोगविभूतिकं मुक्तोपसृप्यमनौपाधिकमवस्थानम्। व्यूहश्च मुमुक्षुसिसृक्षया प्रदेयसृष्टिस्थितिलयाः शास्त्रतदर्थतत्फलानि ध्यानाराधने लीला चेतीदृशकार्योपभुक्तिविभवपरगुणरूपव्यापार-शीकरव्यूहनिर्वाहितलीलाविभूतिकं मुक्तिसाधकं चतुर्धावस्थानम्। विभवश्च तच्छायः सुरनरतिर्यगादिः स्वविभवसजातीय ऐच्छः प्रादुर्भाववर्ग इति।... तत्र प्रादुर्भावाः केचित् साक्षात्, यथा मत्स्यकूर्मादयः। अन्ये तु ऋष्यादिविशिष्टपुरुषाधिष्ठानेन, यथा भार्गवरामकृष्णद्वैपायनादयः। अपरे काले शक्त्यावेशेन, यथा [1]पुरञ्जनादिषु । इतरे च व्यक्तिषु स्वयमेवावतीर्य, यथार्चावतार इति चतुर्धा" (पृ. १८२) इति।

अत्र पराशरभट्टारकेण विभवानां चातुर्विध्यं प्रदश्यार्चावतारस्य तत्रैवान्तर्भावः प्रदर्शितः। लक्ष्मीतन्त्रे तु— "अर्चापि लौकिकी या सा भगवद्भावितात्मनाम् । मन्त्रमन्त्रेश्वरन्यासात् सापि षाड्गुण्यविग्रहा॥ पराद्यर्चावतारेऽस्मिन् मम रूपचतुष्टये"।

---

१. शक्त्याविष्टस्य पुरञ्जनस्य कथानकमेतत्— "तेजसाऽऽप्यायितो विष्णोः पुरुषस्य महात्मनः" (९.६.१३) इत्येवं श्रीमद्भागवते वर्ण्यते ।

(२.५९-६०) इत्येवं चातुर्विध्यं परब्रह्मणः प्रतन्यते। अत्रार्चावतारस्य स्पष्टं पृथग् निर्देशो विद्यते । वस्तुतस्तु— "गुणकल्पनयाऽध्यस्तो गुणोन्मेषकृतश्रमः। मूर्तीभूतगुणश्चेति त्रिधा मार्गोऽयमद्भुतः।।" (२.३९) इत्येवं लक्ष्मीतन्त्रेऽपि त्रैविध्यमेव परब्रह्मणो वर्ण्यते। "व्याप्तिमात्रं गुणोन्मेषो मूर्तीकार इति त्रिधा" (५.२०) इत्यहिर्बुध्न्यवचनस्यैव व्याख्यानमेतत्। तथापि— "मूर्तीभूतगुणत्वरूपं विभवत्वं विभवार्चावतारयोरुभयत्रापि समानम्" (पृ. ११) इति सात्वतसंहिताभाष्यकारदिशा लक्ष्मीतन्त्रोक्तं परब्रह्मणश्चातुर्विध्यमपि समर्थनीयम्। वरवरमुनिविरचिततत्त्वत्रयव्याख्याने (पृ. १०१-१०२) तदेतद् द्रष्टव्यम्।

तत्त्वत्रयव्याख्यानधृत(पृ. १०१-१२०)विष्वक्सेनसंहितायां तु परब्रह्मणः [१]पर-व्यूह-विभव-अन्तर्यामि-अर्चावतारभेदेन पञ्चप्रकारत्वमुपदिश्यते। तथैवोपपादितमेतत् तत्त्वत्रये तद्व्याख्याने च। [२]यतीन्द्रमतदीपिकाकारश्रीनिवासदासादयो [३]रामानुजसम्प्रदायानुयायिनः श्रीवैष्णवास्तदेतत् पञ्चविधं परंब्रह्मैवोपासते। एवं चातुर्विध्ये पाञ्चविध्ये वा सत्यपि सात्वतानिष्ठैस्त्रिविधं परब्रह्म उपास्यते। विभवावतारस्य पराशरभट्टारकदिशा चातुर्विध्ये स्वीकृते न कोऽपि विरोधोऽत्रावशिष्यते। "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।।" (१८.६१) इति भगवद्गीतोक्त्याऽन्तर्यामिस्वरूपस्य ब्रह्मणः सत्त्वं सिद्ध्यत्येव। सात्वतसंहितायामपि— "परमेश्वरः।। स्थितोऽन्तर्यामिभावेन रूपमासाद्य निष्कलम्" (९.९६-९७) इत्येवं ब्रह्मणोऽन्तर्यामित्वं [४]निष्कलत्वं च प्रतिपाद्यते ।

---

१. वरवरमुनिविरचितव्याख्यानसहितस्य तत्त्वत्रयस्य वाराणसीमुद्रितं द्वितीयं संस्करणमवलोकनीयम् (पृ. १०१-१०२)।

२. तत्रैव १०१-१२० पृष्ठानि द्रष्टव्यानि ।

३. यतीन्द्रमतदीपिका पुण्यपत्तनस्थानन्दाश्रमग्रन्थावलिप्रकाशिता (१९३४ ई. वर्षीयं द्वितीयं संस्करणम्, पृ. ८३-८९) द्रष्टव्या। डॉ. श्रादरमहोदयेनापि स्वकीये भूमिकाग्रन्थे शुद्धसृष्टिनिरूपणप्रकरणे तत्त्वत्रय-यतीन्द्रमतदीपिकासाहाय्येन तदेतत् पञ्चविधं ब्रह्म व्याख्यातम् ।

४. ब्रह्मणो निष्कलं सकलं च स्वरूपं तन्त्रागमेषु वर्ण्यते। अत्रापि विभवपरिच्छेदे तत्प्रदर्शितम् । अन्तर्यामितया निष्कलात्मना च स्थितो भगवानाप्तकामः स्वव्यापारवशेन स्वां शक्तिमालम्ब्य पद्मनाभाद्यात्मना सकलं स्वरूपं धत्ते (९.९७-९८)। विभवात्मकोऽयं भगवानत्र निष्कलात्मना सकलात्मना चार्च्यत्वेन वर्णितः (९.११४-११५)।

एवं सत्यपि सात्वतायां त्रिविधस्य परब्रह्मण एवोपासना सविस्तरं वर्णिता। रत्नत्रयाख्यया प्रसिद्धासु संहितासु सात्वतैव प्रथमेति पाञ्चरात्रीयं दर्शनं तद्दिशैव व्याख्येयम्। परब्रह्मलक्षणम्, परब्रह्मणो दशाद्वयम्, [1]व्यूहान्तरम्, एकोनचत्वारिंशद्विभवाः, शक्तीशस्तस्य शक्तयश्च, शक्तीशस्य मन्त्ररूपा तनुः, प्राणाधिपतयः सत्यादयः, भवोपकरणम्, शब्दब्रह्म— इत्येते विषया अस्माभिरुपरि निर्दिष्टे स्थले तत्रत्यासु टिप्पणीषु च सात्वतपद्धत्या व्याख्याताः। अन्यासु संहितासु विवृतं पाञ्चरात्रीयं दर्शनमुपरि निर्दिष्टेषु ग्रन्थेषु द्रष्टव्यम्।

इदं चावधेयमत्र— सात्वतादिषु वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धनाम्ना वर्णितश्चतुर्व्यूहो जयाख्यायां [2]शुद्धसृष्टिप्रकरणे वासुदेव-[3]अच्युत-सत्य-पुरुषनाम्ना वर्ण्यते (४.२-१४)। अत्र (४.७) पुरुषोऽनन्तनाम्नाऽप्यभिधीयते। नारायणाख्यस्य विष्णोः परब्रह्मणः पुरुष-सत्य-अच्युत-अनिरुद्धाख्याश्चतस्रो मूर्तयः प्रादुर्भवन्तीति वैखानसमतं चात्र पूर्वमेवास्माभिर्निरूपितम्। अत्र त्रिषु नामसु क्रमभेदोऽवधानार्हः।

अहिर्बुध्न्यसंहितायामेकोनचत्वारिंशद्विभवदेवाः प्रतिपादिताः — "त्रिंशच्च नव चैवैते पद्मनाभादयो मताः" (५.५७) अत्र भाष्यकारेण पद्मनाभादयोऽ-

---

१. चतुर्व्यूहात् प्रादुर्भूतानि द्वादश व्यूहान्तराणि द्वादश मासाधिपतित्वेन नैकासु संहितासु पुराणेषु च वर्णितानि। चतुर्व्यूहादेव दशावताराणां विभवदेवानां च प्रादुर्भावः समजायतेत्येतदर्थं द्रष्टव्यम्—पाञ्चरात्रागम (पृ. ५२-५३)।

२. शुद्धाया अशुद्धायाश्च सृष्टेर्विवरणं डॉ. श्रादरग्रन्थे (पृ. २७-८५), डॉ. चौधरीग्रन्थे (पृ. ४७-६२) च द्रष्टव्यम्। सिद्धान्तशैवागमीया शुद्धाशुद्धसृष्टिप्रक्रियाऽस्मदीये लुप्तागमसंग्रहद्वितीयभागोपोद्घाते (पृ. १८७-१९७) द्रष्टव्या।

३. "अच्युताद्या मूर्तयस्तिस्रः" (पृ. २९) इति, "सङ्कर्षणप्रद्युम्नानिरुद्धाना-मेवाच्युतसत्यपुरुषापरनामधेयत्वं बोध्यम्" (पृ. २९) इति च सात्वत-भाष्यकारोऽलशिङ्गभट्टः। एताश्च वासुदेव-अच्युत-सत्य-पुरुषाख्याश्चतस्रो मूर्तयोऽप्ययक्रमेण विदिक्षु पूज्यन्ते (पृ. ८८), एतासां चत्वारो मन्त्रा (पृ. ५५,८८,१०५,१३३) अत्रैव भाष्ये द्रष्टव्याः। जयाख्यायां (४.२-१९) मूर्तिचतुष्टयस्यास्य स्वरूपादिकमवलोकनीयम्। वैखानसास्तु पुरुष-सत्य-अच्युत-अनिरुद्धाख्यं मूर्तिचतुष्टयं समाराधयन्ति। वैखानसागमविवरणे सात्वतभाष्ये (पृ. २९) चैतद्वर्णितं द्रष्टव्यम्। भाष्ये समुद्धृतं महाभारतीयं सार्धश्लोकद्वयं दाक्षिणात्ये पाठ एव समुपलभ्यत इति विभावनीयम्।

ष्टत्रिंशद्विभवदेवाः, तेषामधिपतिर्विशाखयूपस्त्वेकः, तेन सहैकोनचत्वारिंशद् देवा इत्यभिप्रायेण "त्रिंशच्च नव चैवैते" इति व्यवस्था दत्ता। डॉ. श्रादरमहोदयेन तु स्वकीये ग्रन्थे (पृ. ४२-४६) विशाखयूपं विहाय पद्मनाभादिष्वेकोनचत्वारिंशत्संख्यापूर्तये 'शान्तात्मा' पृथग् देवत्वेन वर्णितः। अहिर्बुध्न्यसंहितासंस्करणेऽपि (५.५४) शान्तात्मनः पृथगुल्लेखो विहितस्तेन। सात्वतसंहितायां (१२.११०) शान्तात्मनो ध्यानं विद्यत इति च स वदति (तत्रैव, पृ. ४६ टिप्पण्याम्)। [1]एतच्च सर्वमसदिति विभावनीयं सुधीभिः।

तथाहि— विभवदेवेषु "लोकनाथस्तु शान्तात्मा" (९.८१) इत्येवं सविशेषणं लोकनाथो वर्ण्यते। "शान्तात्मेति लोकनाथस्य विशेषणम्" (पृ. १८४) इति च भाष्यकार आह। द्वादशे परिच्छेदेऽस्य ध्यानमेवं वर्ण्यते— "लोकनाथं विशालाक्षं सर्वदेवनमस्कृतम्।। वरसिंहासनारूढं ध्यायेन्मीलितलोचनम्। पद्मासनेनोपविष्टं पद्मगर्भोपमद्युतिम्।। करुणाविष्टमूर्तिं च शङ्खपद्मकराङ्कितम्। ज्ञानवैराग्यसद्धर्ममार्गत्रयनिदर्शकम्।।" (१२.१०८-११०) इति। "अस्य रूपान्तरं बुद्धावतार इति बोध्यम्" (पृ. २३९) इत्युक्त्वा भाष्यकारः पौष्करसंहितावचनमेवं समुद्धरति— "लोकेश्वरः शान्ततनुर्बौद्धं यस्यापरं तनुः। नियन्ता बुद्धिधर्माणां हिंसादोषस्य दूषकः।।" (३६.२२६) इति। अस्य स्थानं च पौष्करप्रामाण्येनैव प्रदर्शयति— "मगधामण्डले विप्र महाबोधिधराश्रितः। संस्थितो लोकनाथात्मा देवदेवो जनार्दनः।।" (३६.३५९-३६०) इति।

ततो भाष्यकारः— "तत्त्वत्रयव्याख्याने (पृ. ११०) बुद्धस्य साक्षादवतारत्वमाचार्यहृदये प्रतिपादितम्। विष्वक्सेनसंहितादिषु तस्यावेशावतारत्वमुक्तम्। उभयोर्विरोधः कल्पभेदेन परिहरणीयः" (पृ. १८७) इति वदत्यस्मिन् प्रसङ्गे। तत्त्वत्रयव्याख्यानधृतविष्वक्सेनसंहितायामनर्च्यप्रादुर्भावप्रसङ्गे— "मोहनाख्यस्तथा बुद्धः" (पृ. ११०) इत्युच्यते। तत्रैवोद्धृतसंहितान्तरेऽपि बुद्धाद्या अनुपास्या उक्ताः

---

१. गतानुगतिको लोक इति न्यायेन तत्परवर्तिनो विद्वांस आङ्ग्लभाषाप्रियाः सर्वेऽपि प्रायो लोकनाथं शान्तात्मानं च पृथग् देवत्वेन वर्णयन्ति। डॉ. अशोककुमारकालियामहोदयेन तु भाष्यकार-अलशिङ्गोक्तिरेवात्रानुसृता (लक्ष्मी...पृ. ७७-७९)। लक्ष्मीतन्त्रे हि— "त्रिंशच्चाष्टाविमे देवाः पद्मनाभादयो मताः" (११.३८) इति विभवदेवानां संख्याऽष्टत्रिंशदेव प्रदर्शिता।

(पृ.११०)। अलशिङ्गभट्टमतानुसारं बुद्धस्य साक्षादवतारत्वमाचार्यहृदये प्रतिपाद्यते। "स्वेन रूपेणावतीर्णवान्" इति तत्त्वत्रयव्याख्यानस्थं (पृ. ११०) वचनमाचार्यहृदयस्यैव स्यात्। न केवलमाचार्यहृदये, विष्वक्सेनसंहिताप्रतिपादितेषु षट्त्रिंशद्विभवेष्वपि लोकनाथः परिगण्यत एव। एवं च वचनयोरनयोर्विरोधः कल्पभेदेन परिहरणीय इत्येव वर्तते शास्त्रानुसारी पन्थाः। ऐतिहासिकास्तु सात्वतायां पौष्करायां च लोकनाथो विभवेषु परिगण्यते। विष्वक्सेनसंहिता च बुद्धावतारस्यानर्च्यत्वं मोहनात्मकत्वं चाहेति परवर्तिपुराणसाहित्यस्यायं प्रभाव इत्याचक्षीरन्।

## पाञ्चरात्रीयो योगः

सात्वतसंहितायां प्रतिपादितो योगः सलक्षणोऽस्माभिस्तत्रत्ये उपोद्घाते (पृ. ४३-४८), आगममीमांसायां (पृ. २३-२६) च निर्दिष्ट इति नात्र पिष्टपेषणमाचर्यते। जयाख्यायां प्रतिपादितोऽष्टाङ्गो योगः [१]पातञ्जलयोगाद् भिन्नः। एवमेव विष्णुसंहितायां वर्णितः षडङ्गो योगोऽपि तत्र सूचितः, नित्याषोडशिकार्णवस्य उपोद्घाते (पृ. ११७-११९), आगममीमांसायां (पृ. ७३-७४) चान्यतन्त्रसंवादेन तस्य स्वरूपमुन्मीलितम्। अभिगमनादिपञ्चकालेष्वन्तिमस्य योगकालस्य निरूपणावसरे पाद्मसंहिता-नारदसंहिता-श्रीप्रश्नसंहिता-विष्णुतिलक-

---

१. जयाख्यायां योगाख्यानपटले (३३.११) प्राणायाम-प्रत्याहार-ध्यान-धारणा-जप-योग-ऊह-समाधिभेदैरष्टाङ्गो योगो वर्णितः। मृगेन्द्रागमे योगपादेऽपि "प्राणायामः प्रत्याहारो धारणा ध्यानवीक्षणे। जपः, समाधिरङ्गान्यङ्गी योगोऽष्टमः स्वयम्॥" (श्लो. ३) इत्येवमिमान्येव योगाङ्गानि निर्दिश्यन्ते। अत्र वीक्षणमभिवीक्षणमूह इत्यनर्थान्तरम्। अन्यत् सर्वं समानम्। सप्त अङ्गानि, अङ्गी योगश्चाष्टम इति प्रतिपादनभङ्गिभेदः। अथवाऽस्ति जयाख्यायां किञ्चिदत्र वैशिष्ट्यम्। अत्र हि प्राकृतं पौरुषम् ऐश्वर्यं चेति योगभेदत्रयं वर्ण्यते (३३.१३)। विवरणं चात्रापेक्षितम्। न च तद् दृश्यते मृगेन्द्रागमेऽपि। उभयत्र जपोऽपि योगाङ्गतया निर्दिश्यते। वाचिकः, उपांशुः, मानस इति त्रिविध एष जपः सर्वत्र प्रतिपाद्यते। लक्ष्मीतन्त्रे तु— "वाचिकं क्षुद्रकर्मार्थमुपांशुः सिद्धिकर्मणि। मानसो मोक्षलक्ष्मीदो ध्यानात्मा सर्वसिद्धिकृत्॥" (३९.३५) इत्येवं ध्यानात्मा चतुर्थः प्रकारोऽपि जपस्य प्रदर्श्यते। जपध्यानादिरूपः क्रियालक्षणो योगो लाकुलीशे मतेऽपि वर्ण्यते। एवं च जपस्य योगाङ्गता सर्वप्रथमं पाशुपतमते स्वीकृतेति वक्तुं शक्यते। सगर्भोऽगर्भश्चेति जपस्य द्वौ भेदावपि शास्त्रेषु वर्ण्येते।

संहिता-पारमेश्वरसंहिता-लक्ष्मीतन्त्रादिषु वर्णिता योगप्रक्रिया "पाञ्चरात्रागम" (पृ. ३३३-३४७) इत्यत्र वैशद्येन वर्णिता। अत्र हि मन्त्रयोगः, लययोगः, परिचययोगः, निष्पत्तियोगः, हठयोग इत्यादयो योगावस्थाभेदाः सूच्यन्ते। कर्मयोगो ज्ञानयोगश्चात्र चर्च्यते। पातञ्जलयोगप्रतिपादितोऽष्टाङ्गो योगश्च तत्प्रक्रिययैव निदर्श्यते। यमानां नियमानां च संख्या वैखानसयोगवदत्रापि दशविधैव वर्तते। नवविधान्यासनानि, प्राणायामप्रक्रियया दशविधनाडीषु दशविधवायूनां निरोधः, प्राणायामभेदाः, प्राणायामलक्षणम्, प्रत्याहारप्रसङ्गे ऊनविंशतिमर्मस्थानेषु वायोः प्रत्याहरणम्, पञ्चभूतमये देहे यमादिसाहाय्येन मनसो धारणम्, ध्यानप्रक्रिया, समाधिलक्षणपुरस्सरं जीवात्मपरमात्मनोरैक्यापादनमित्यादयो विषया अत्र वैशद्येन विव्रियन्ते। प्रक्रियैषा वैखानसागम-पुराणादिप्रतिपादितप्रक्रियया नातीव वैषम्यं धत्ते। जयाख्यसंहिता-अहिर्बुध्न्यसंहितानिर्दिष्टश्च योगो डॉ. दासगुप्तसंदृब्धे इतिहासग्रन्थेऽपि (पृ. २८-२९, ५४-५६) संक्षेपेण निर्दिष्टः। अत्रापि यमानां नियमानां च दश दश भेदाश्चर्च्यन्ते। जयाख्यायामासनानि चतुर्विधान्येव निर्दिष्टानि। विशेषजिज्ञासुभिरनुशीलनपरायणैश्च विद्वद्भिस्तत्र तत्रैव सर्वमेतद् द्रष्टव्यम्। पुराणगतो योगश्च बृहदितिहासस्य तन्त्रागमीये खण्डे समाविष्टे "पुराणगत योग एवं तन्त्र" इति शीर्षके निबन्धे डॉ. करुणा एस. त्रिवेदिना विरचिते (पृ. ५०३-५१४) द्रष्टव्यः।

## पाञ्चरात्रीयाः क्रियाश्चर्याश्च

### दीक्षा अभिषेकश्च

आगम-तन्त्रशास्त्रप्रतिपादितायामाराधनायां सर्वत्र दीक्षितस्यैवाधिकारः स्वीक्रियते। दीक्षापदव्युत्पत्तिरपि प्रायः सर्वत्र समानैव प्रदर्श्यते। 'दा दाने', 'क्षि क्षये' इति द्वाभ्यां धातुभ्यां दीक्षाशब्दोऽयं निष्पद्यते। योग्येन समर्थेन च गुरुणा शास्त्रोपदिष्टपद्धत्या योग्याय शिष्याय प्रदत्तेन ज्ञानेन तस्य शिष्यस्याज्ञानं क्षीणतामेति, गुरुप्रदत्तमन्त्राराधनविधिना च तस्याज्ञानं विनश्यति, ज्ञानाङ्कुरश्च तत्र प्रादुर्भवति, यो हि शनैः शनैर्मुक्तिपादपरूपेण प्रवर्धते। दीक्षाप्रसङ्ग एव सद्गुरोः सच्छिस्यस्य च लक्षणम्, देशकालविचारः, दीक्षाभेदाः, दीक्षाविधिः, अधिवासनम्,

मण्डप-[१]मण्डलनिर्माणम्, अङ्कुरार्पणम्, [२]पवित्रारोपणमित्यादयो विषया अपि यथायथं संक्षेपविस्तराभ्यां सर्वत्र चर्च्यन्ते। दीक्षाया अधिकारी कः? कीदृशश्च आचार्यो दीक्षादाने समर्थ इत्यत्र तु वैमत्यमपि दृश्यते। सर्वेऽप्यत्राधिकृता इत्येकः पक्षः, अपरश्च पक्षो वर्णाश्रमव्यवस्थावदत्रापि शूद्रो नाधिकृत इति वदति।

पाञ्चरात्रागमेषु दीक्षितस्य चतस्रोऽवस्था वर्णिताः। ताश्च [३]समयी, पुत्रकः, साधकः, आचार्यश्चेति नामभिरभिधीयन्ते। प्रथमतो गुरुः शिष्याय कांश्चन समयान् (नियमान्) प्रददातीति स समयीत्युच्यते। नियमपालने प्रवीणः शिष्यो गुरुणा पुत्रवदङ्गीक्रियत इति स पुत्रक इति नाम्ना परिचीयते। गुरूपदिष्टपद्धत्या मन्त्रजपादिना स्वेष्टदेवताराधनायां निरतः स साधक इत्यभिधीयते। अन्ते च गुरुप्रसादात् स साधक आचार्यपदवीमाप्नोति। आचार्यपदमारूढ एव गुरुरन्यान् दीक्षयितुं समर्थः। समयी, पुत्रकः, साधको वा नात्राधिकृतः। शैवशाक्तागमेष्वपि पूर्णाभिषिक्त एव गुरुरन्यान् दीक्षयितुं समर्थ इति साटोपं साध्यते।

---

१. मण्डलसम्बद्धद्वारशोभादिपारिभाषिकशब्दानामर्थाः "भारतीय तन्त्रशास्त्र" (पृ. ४७२,४७७-४८३) इत्यत्र व्याकृता द्रष्टव्याः।

२. सात्वतायां पवित्रारोपणपरिच्छेदात् पूर्वं त्रयोदशपरिच्छेदेषु नित्यान्यभिगमनादीनि, नैमित्तिकानि च व्रतादीनि कर्माणि वर्णितानि। तेषामाकस्मिके लोपे प्रत्यवायो जायते। कथं तस्योपशमनं क्रियेतेति प्रश्नस्य सङ्कर्षणोपस्थापितस्य समाधानाय प्रवर्तते तत्र पवित्रारोपणाख्यश्चतुर्दशः परिच्छेदः। "लोभबुद्धिं विना" (१४.४) इत्यादिना "सौत्रं परिसरम्" (१४.९) इत्यन्तेन ग्रन्थेन प्रश्नोऽयं समाधीयते भगवता। तदनु च आ परिच्छेदान्तं पवित्रारोपणविधिः प्रदर्श्यते, तदङ्गतयैव च पञ्चदशे परिच्छेदे स्नपनं विधीयते। तदेतेषु सर्वेषु कर्मसु प्रत्यवायोत्पत्तौ तदुपशमनोपायश्च द्वयोः परिच्छेदयोः (१४-१५) प्रोक्तः। मन्त्रलोप-क्रियालोप-द्रव्यलोपादिसम्भवे हि कृच्छ्रचान्द्रायणादि-व्रतान्यनुष्ठीयन्ते। तेषामपि पूरकं चातुर्मास्यव्रतम्। तस्यापि पूरकं पवित्रारोपणम्। अतोऽस्य सर्वप्रायश्चित्तत्वमुक्तं भवति। दीक्षित एवाधिकृतो भवतीति तदनु दीक्षाप्रकरणं षोडशपरिच्छेदतः प्रारभ्यते। सोऽयं पवित्रारोपणविधिः सर्वप्रायश्चित्तप्रधानभूत इति सर्वेषु वैष्णवेषु शैवेषु शाक्तेषु च तन्त्रेषु यथायथं संक्षेपविस्तराभ्यां वर्ण्यते।

३. समयिपुत्रकादिविभागः शैवेषु शाक्तेषु च तन्त्रागमेषु तथैव व्यावर्ण्यते।

बौद्धतान्त्रिका दीक्षापदस्य स्थानेऽभिषेकपदं प्रयुञ्जते । विप्रभिक्षुणा धर्मकीर्तिना प्रबलाभिर्युक्तिभिर्दीक्षासंस्कारो [1]विखण्डित:। तदनु च सर्वेष्वपि बौद्धतन्त्रेषु दीक्षापदस्य स्थानेऽभिषेकपदस्यैव प्रयोगो दृश्यते । अन्यत्र तु भिन्नार्थकावेतौ शब्दौ । आचार्यपदमारूढस्य शिष्यस्य गुरुरभिषेकं करोति। तत: परमेव तस्मिन् दीक्षादानसामर्थ्यमाविर्भवतीति तेषां पक्ष:। जयाख्यसंहितायां तु दीक्षाभिषेकशब्दौ पर्यायतया प्रयुक्ताविव दृश्येते। तद्यथा—

**सेनापतिक्रमेणैव समयज्ञस्य सर्वदा ।**
**महामन्त्रित्वविधिना पुत्रकस्याभिषेचनम् ।।**
**युवराजविधानेन दातव्य: साधकस्य च ।**
**राजोपचारविधिना अभिषेको गुरो: स्मृत: ।।** इति (१८.३४-३५)।

इदं त्ववधेयमत्र—जयाख्यायां षोडशे पटले दीक्षाविधानमष्टादशे चाभिषेकविधिर्वर्तते । एवमेव सर्वेष्वपि शैवशाक्तादितन्त्रेषु भिन्नयो: प्रकरणयोरनयोर्विधानमुपदिश्यते। अत्र सात्वतसंहिताभाष्यकारेण द्विविध: पक्ष उपस्थापित:— "सात्वते केवलमाचार्याभिषेकविधानमुक्तम्, जयाख्ये च चतुर्णामप्यभिषेका: प्रयोगभेदाश्च वर्णिता इति । सात्वते आचार्याभिषेकमात्रस्योक्तत्वात् साधकाद्यभिषेकविधानानामनुक्तत्वाच्चैतन्निष्ठैराचार्याभिषेकमात्रमनुष्ठेयम्। यद्वा "अनुक्तमन्यतो ग्राह्यम्" इति न्यायेन साधकाद्यभिषेकाद्यनुष्ठानेऽपि न प्रत्यवाय इति" (पृ. ४११)।

इदं चात्रावधेयम्— सात्वतोपबृंहणेश्वरतन्त्रे "इत्येवमभिषेकस्तु भवेन्मुख्याधिकारिणाम्।। अन्ये तु दीक्षामात्रेण संस्कार्या मुनिपुङ्गवा:।" (२१.५०३-५०४) इत्येवं स्पष्टोक्ते:, पाद्मे तन्त्रेऽपि चाचार्यवंशजानामेवाभिषेकस्य प्रतिपादितत्वादभिषेकस्य द्वौ प्रकारौ स्वीकर्तव्यौ। एको दीक्षाङ्गत्वेन, अपरश्चाधिकारप्राप्त्यङ्गत्वेन। प्रथम:

---

१. स्वच्छन्दोद्योते क्षेमराजेन धर्मकीर्तिमतं समालोचितम् । सोऽयं विषयोऽस्माभि: परामृष्ट: "दीक्षाविषयक सौगत पक्ष पर क्षेमराज का दृष्टिकोण" इति शीर्षके निबन्धे । 'धी:' पत्रिकाया: प्रथमोऽङ्कोऽत्र द्रष्टव्य: (पृ. १०६-११२)।

प्रकारः सामान्याभिषेक इति, अपरश्च पूर्णाभिषेक इति प्रोच्यते। तत्र सामान्याभिषेको दीक्षाया अङ्गम्, पूर्णाभिषेकश्चाधिकारप्रापकः। शाक्तेषु खलु तन्त्रेषु पूर्णाभिषिक्त आचार्य एव परीक्षितान् योग्यान् शिष्यान् दीक्षयतीति पूर्णाभिषेको योग्यस्याचार्यस्यैव क्रियते। एवं च दीक्षाधिकारप्राप्तये योग्य आचार्य एव पूर्णाभिषेकविधिना सभाजनीय इति स एव पक्षः सात्वतायामादृतः। जयाख्योक्तिस्तु सामान्याभिषेकपरतया नेया।

दीक्षाया अभिषेकस्य चायं विषयः सात्वतसंहिताया उपोद्घाते (पृ. ५४-६४) विवृतोऽस्माभिः। भोगदा मोक्षदा चेति द्विविधा दीक्षा भवति। तस्या अपि स्वरूपं तत्र वर्णितम्। एवमेव डॉ. अशोककुमारकालियानिबद्धे "पाञ्चरात्र दीक्षा का स्वरूप"[१] इति शीर्षके निबन्धेऽपि दीक्षाविषयका विविधाः पक्षाः सम्यगुपवर्णिताः। कालियामहोदयेन लक्ष्मीतन्त्रप्रामाण्येन त्रिविधा दीक्षा वर्णिता। तद्यथा —

**महामण्डलयागेन हवनाद् वाऽथ केवलात्।**

**वाचा केवलया वापि दीक्षैषा त्रिविधा पुनः॥**

**वित्ताढ्यस्याल्पवित्तस्य द्रव्यहीनस्य च क्रमात्।** (४१.९-१०)

अत्र महामण्डलयागप्रसङ्गे निबन्धलेखकेन चक्राब्जमण्डल-भद्रकमण्डलयोः स्वरूपं सचित्रं सम्यगुपस्थापितम्[२]। मण्डलाराधनविधिः पाञ्चरात्रागमीयपौष्करसंहितायां विस्तरेण वर्ण्यत इति च डॉ. प्रभाकर-आपटेमहोदयेन स्वकीये "मण्डलाकृति परिचय" इति शीर्षके निबन्धे सुष्ठु प्रतिपादितम्[३]। पाञ्चरात्रागमवच्छैवसिद्धान्तागमेषु बौद्ध-तन्त्रेषु च सोऽयं मण्डलाराधनविधिर्विस्तरेण वर्ण्यते। सर्वास्वेतासु तन्त्रागमशाखासु मण्डलाराधनपद्धत्यैव दीक्षासंस्कारः सम्पाद्यते। परवर्तिनि काले कौलतन्त्रेषु— "अदृष्टमण्डलोऽप्येवं...स सिद्धिभाग्" (परात्रीशिका, श्लो. १८),

१. भारतीय तन्त्रशास्त्र, पृ. ४२३-४६१ द्रष्टव्यानि।

२. तत्रैव, पृ. ४४६-४५३ द्रष्टव्यानि।

३. तत्रैव, पृ. ४७७-४८१ द्रष्टव्यानि।

बौद्धतन्त्रेषु च— "अमण्डलप्रविष्टश्च" (ज्ञानसिद्धिः, पटल १५, पृ. १४४) मण्डलप्रवेशो नैवावश्यक इति सिद्धान्तः समुदभूत्। तस्यैवायं परिणामो यदधुना मण्डलाराधनविधिर्विलुप्त इव दृश्यते। अङ्गुलिगण्या एव विद्वांसः साम्प्रतं तत्स्वरूपमुन्मीलयितुं क्षमाः। वैदिककर्मकाण्डे सर्वतोभद्रादिमण्डलरूपेण तस्य प्रवेशोऽवश्यमेव समजायत।

अधिवासनम्, स्वप्नविचारः, दन्तकाष्ठभक्षणम्, दीक्षितेन पालनीया नियमा इत्येतादृशा दीक्षासंस्कारसम्बद्धाः सर्वे विषया डॉ. अशोककुमार-कालियाकृते पूर्वोद्धृते[१] निबन्धे सप्रमाणमुपस्थापिताः। पाञ्चरात्रागमे दीक्षित एकान्ती, पाञ्चरात्रिकः, सूरिः, भागवतः, सात्वतः, पाञ्चकालिक इत्येताभिः संज्ञाभिः परिचीयत इति च तत्रैव निर्दिष्टम्। एवमेव "पाञ्चरात्रागम"[२] इत्याख्ये ग्रन्थेऽपि विभिन्नासु संहितासु वर्णिता दीक्षाप्रक्रियाः [३]षडध्वशोधनपुरस्सरं [४]तापादिपञ्चसंस्कारपुरस्सरं च विवृतास्तत्रैव द्रष्टव्याः।

एवमत्र विचारितौ दीक्षाभिषेकौ। दीक्षितो मूर्त्यादिषु स्वेष्टदेवतामाराधयति। तदर्थं प्रतिमाप्रासादादिनिर्माणमपेक्षितं भवतीति त इमे सर्वे विषयाः प्रतिमानिर्माण-प्रतिमोपादानद्रव्य-प्रतिमामान-आलयकल्पन-आलयनिर्माण-प्रतिमाप्रतिष्ठा-उत्सवस्नपन-पवित्रारोपण(पवित्रोत्सव)प्रभृतयः, वैष्णवाचारास्तद्भेदाश्चेत्येवमादयो विषयाश्च क्रियाचर्यापादसम्बद्धाः "पाञ्चरात्रागम" [५]इत्याख्ये ग्रन्थे (अष्टाध्यायात्मके)

---

१. तत्रैव, पृ. ४५३-४६१ द्रष्टव्यानि।

२. अत्रत्यं "पाञ्चरात्रिक दीक्षा" इति प्रकरणं द्रष्टव्यम् (पृ. २६६-३०८)।

३. "वैष्णवेषु तदितरेषु चागमेषु षडध्वविमर्शः" इति शीर्षकोऽस्मदीयो निबन्धस्तन्त्रयात्रायां पुनर्मुद्रितः (पृ. १४-३४)। लुप्ता. उपो. षडध्वशोधनप्रकरणं चात्र द्रष्टव्यम् (पृ. १७४-२०२)।

४. "तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः" इत्येवं निर्दिष्टाः पञ्च संस्काराः "पाञ्चरात्रागम" (पृ. ३०४-३०८) इति ग्रन्थे वर्ण्यन्ते।

५. डॉ. राघवप्रसादचौधरीसंदृब्ध एष ग्रन्थो भागचतुष्टयषोडशाध्यायात्मको "बिहार राष्ट्रभाषा परिषद्, पटना" इत्यतः १९८७ ई. वर्षे प्रकाशितः।

द्वितीये तृतीये च भागे वैशद्येन विवृताः (पृ. १०५-२४७)। अस्यैव ग्रन्थस्य दर्शननिरूपके प्रथमे भागे तृतीयाध्याये मन्त्रपदव्युत्पत्ति-मन्त्रोद्धारप्रक्रियापुरस्सरं [1]मन्त्रविचारः, चतुर्थे चाध्याये मुद्राविचारः कृतः (पृ. ६३-१०४)। २७२ मुद्रानामान्यत्र परिशिष्टभागे (पृ. ३४८-३६५) प्रदत्तानि। एवमेव विशिष्ट-शब्दविवरणी (पृ. ३९०-३९८) अत्र धृता । कासाञ्चन मुद्राणाम्, [2]भद्रकमण्डलस्य, मूर्तीनाम्, स्नपनपीठस्य च चित्राण्यप्यत्र प्रदर्शितानि। ग्रन्थारम्भेऽत्र आगमसामान्यलक्षणपुरस्सरं पाञ्चरात्रागमस्य (पृ. ९-१६), पाञ्चरात्रसाहित्यस्य (पृ.२१-२९), तत्प्रतिपाद्यविषयाणां (पृ. २९-३५) च विवरणमस्ति। एवं च पाञ्चरात्रागमस्य सर्वाङ्गपूर्णः परिचयोऽनेन ग्रन्थेनाधिगन्तुं शक्यते ।

"लक्ष्मीतन्त्र : धर्म और दर्शन" इति ग्रन्थातिरिक्तं निबन्धद्वयं डॉ. कालियामहोदयस्याधुनैव प्रकाशितम् । तयोरेकः पाञ्चरात्रदीक्षाविषयको निबन्धः "भारतीय तन्त्रशास्त्र" (पृ. ४२३-४६१) इत्यत्र, अपरश्च इतिहासदृष्टिप्रधानः "पांचरात्र परम्परा और साहित्य" इति शीर्षको बृहदितिहासस्य तन्त्रागमीये खण्डे (पृ. ५८-१०२) स्थानमलभत। तेषु तेषु प्रकरणेष्वत्र सूचिता विषयाः समुपन्यस्ता एव, तथापीतिहासखण्डे पाञ्चरात्रशास्त्रस्य श्रुतिमूलकता, पाञ्चरूप्य-पञ्चकाल-पञ्चसंस्काराणां विवरणम्, सिद्धान्तभेद-गुणभेदादिना संहितानां वर्गीकरणम्, व्याख्यानसंहितानां दिव्यदेशानां परिचय इतीदृशा विषया जिज्ञासूनां मनस्तोषाय कल्पेरन्। अत्रत्यं पञ्चरत्नप्रकरणं (पृ. १००) परिशोध्यैवास्माभिः स्थापितम्।

एवमेव दासगुप्तकृतस्य इतिहासग्रन्थस्य तृतीये खण्डे पाञ्चरात्रविवरणप्रसङ्गे नैका वैष्णवोपनिषदः परिगणिताः। यामुनाचार्यस्यागमप्रामाण्यम्, वेदान्तदेशिकस्य पाञ्चरात्ररक्षा— इत्यादयो ग्रन्थाः पाञ्चरात्रप्रामाण्यसाधकाः प्रसिद्धाः सन्ति । ग्रन्थेऽस्मिन् सिद्धान्तरत्नावलीग्रन्थो विशेषेण परिचाय्यते, गोपालसूरिणः पाञ्चरात्ररक्षासंग्रहस्य चोल्लेखः क्रियते। विभवावतारप्रकरणेऽत्रापि लोकनाथः

१. पाञ्चरात्रसंहितासु स्मृतानां वैदिकमन्त्राणां स्थाननिर्देशपुरस्सरं संकलनं वर्तते ।

२. चक्राब्जमण्डलस्य भद्रकमण्डलस्य च सचित्रं विवरणं "भारतीय तन्त्रशास्त्र" इत्यत्रापि द्रष्टुं शक्यते (पृ. ४४७-४५३) ।

शान्तात्मेति च पृथक् परिगणितौ। शान्तात्मेति लोकनाथस्य विशेषणमिति चास्माभिर्विभवप्रकरणे प्रोक्तमेव। पाञ्चरात्रप्रामाण्यविषयकौ द्वौ ग्रन्थौ तन्त्रशुद्धि-तन्त्राधिकारिनिर्णयाख्यौ स्तः। तयोरेको भट्टारकवेदोत्तमरचितस्त्रिवेन्द्रं संस्कृतग्रन्थमालायामन्यश्च प्रसिद्धवैयाकरणभट्टोजीदीक्षितरचितो वाराणसीतो मुद्रितः। ग्रन्थ एष डॉ. कालियामहोदयेन पुनः परिष्क्रियते।

प्रसङ्गेऽस्मिन् डॉ. जे. गोण्डाविरचितो ग्रन्थः "मिडीवल रिलीजियस लिटरेचर इन संस्कृत" इत्याख्यो विशेषेणावधानार्हः। अत्र पञ्चसु (४-८) अध्यायेषु (पृ. ३९-१३९) विस्तरेण पाञ्चरात्रागमाश्चर्च्यन्ते। तत्र केचन विषया विशेषतो ज्ञातव्याः सन्ति। ग्रन्थारम्भे आगमपदविवरणप्रसङ्गे विदुषाऽनेन सूचितं यदुत्तरे भारते तन्त्रपदेन, दक्षिणे चागमपदेन शास्त्रमेतत् परिचीयते (पृ. २, टि. ५)। अत्रैव तेन— "आगमाल्लोकधर्माणां मर्यादाः पूर्वनिर्मिताः" (१३.१३३.६०) इति महाभारतवचनं स्मर्यते। अत्रैव (पृ. ३) तेन क्रिया-चर्यापदयोरर्थौ वैशद्येन व्याक्रियते। पञ्चरात्र-पाञ्चरात्रशब्दयोः प्रयोगः कुत्र विधेय इत्यपि तेन सूच्यते (पृ. ४, टि. १७)। पाञ्चरात्रसंहितासु मतमतान्तराणामुल्लेखो विद्यत इति तेनाहिर्बुध्न्यादिसंहिताप्रामाण्येन प्रदर्श्यते (पृ. ८५)। श्रीप्रश्नसंहितायां योगतत्त्वोपनिषदो विषया व्याख्याताः (पृ. ९३), एस. जायसवालनिर्मितः "दी ओरिजिन एण्ड डवलपमेन्ट आफ वैष्णविज्म" इत्याख्यो ग्रन्थो दिल्लीतः १९६७ ई. वर्षे प्रकाशितः, नारदसंहितायां [१]बुद्धावतारश्चर्च्यते (पृ. १०२), मत्स्यपुराणे (२००.९) कपिञ्जलसंहिता स्मर्यते (पृ. १०४), छान्दोग्योपनिषदि (२.२३.३) कहोलयाज्ञवल्क्यसंवादः पाञ्चरात्रसिद्धान्ताननुसरति (पृ. ११३), अहिर्बुध्न्यसंहितायां जयाख्याऽपि स्मर्यते (पृ. ११६)— इत्येवमादयो विषया अत्र सप्रमाणं चर्चिताः। बृहद्ब्रह्मसंहितायां स्थिता रुद्रगीता (अ. ६-१०) चर्च्यतेऽत्र (पृ. १०४)। स्मरणार्हमेतद् यद् बृहद्ब्रह्मसंहितायां (२.७.६७-७१) रामानुजाचार्यस्य शाण्डिल्यसंहितायां (४.१५.४३) च वल्लभाचार्यस्य नाम दृश्यत इति। अस्यैव ग्रन्थकारस्य "वैष्णविज्म एण्ड शैविज्म" इत्याख्यो ग्रन्थो लन्दननगरीतः १९७० ई. वर्षे प्रकाशितोऽप्यवश्यमेव दर्शनार्हः।

•

---

१. "लोकनाथस्तु शान्तात्मा" इत्येवं सात्वत-पौष्कर-अहिर्बुध्न्य-लक्ष्मीतन्त्रादिषु बुद्धावतार एव चर्च्यत इत्यत्रैवोक्तमस्माभिरिति (पृ. ३६-३८) नात्र पुनस्तच्चर्च्यते।

# भागवतागमः

"हयशीर्षपञ्चरात्रे आदिकाण्डे (२.२-९) पञ्चविंशतिपाञ्चरात्रागमानां दशभागवतागमानां च नामावली वर्तते। डॉ. ओटोश्रादरमहोदयेनाहिर्बुध्न्य-संहिताभूमिकायां (पृ. ५-११) सर्वे इमे पाञ्चरात्रसंहितासु परिगणिताः। अग्निपुराणे (३९.२-५) अत्रत्यानामेव पञ्चविंशतिपाञ्चरात्रागमानां नामावली वर्तते। यदि शिष्टा अपि संहिताः पाञ्चरात्रीया एव स्युस्तर्हि तासामपि नामावली तत्र संगृहीता भवेत्, न चैवं दृश्यते। एवं चाग्निपुराणे तासामग्रहणात्, "इमे भागवतानां तु" (२.९) इति च तत्र स्पष्टं निर्देशाद् भागवतसम्प्रदायस्येमाः संहिता इति निश्चप्रचम्" (पृ. ९) इत्युक्तमासीदस्माभिः "आगममीमांसा" इत्याख्ये ग्रन्थे।

एतच्च प्रकरणं पुनः परीक्षणमपेक्षते। तदर्थं चात्र हर्षशीर्षपञ्चरात्रस्याग्निपुराणस्य च तत्रत्याः सर्वे श्लोकाः संगृह्यन्ते, परीक्ष्यन्ते च। तथाहि हयशीर्षपञ्चरात्रे—

**प्रोक्तानि पञ्चरात्राणि कल्पे कल्पे पुरा मया।**
**व्यस्तानि मुनिभिर्लोके पञ्चविंशतिसंख्यया ।।**

**आद्यं समस्ततन्त्राणां हयशीर्षं प्रकीर्तितम्।**
**त्रैलोक्यमोहनं तन्त्रं वैभवं पौष्करं तथा ।।**

**नारदीयं तथा तन्त्रं प्राह्लादं गार्ग्यगालवम्।**
**श्रीप्रश्नं शाण्डिलं तन्त्रं तन्त्रमीश्वरसंहिता ।।**

**सत्योक्तमुत्तमं तन्त्रं वासिष्ठं शौनकं तथा।**
**नारायणीयमन्यच्च तन्त्रं ज्ञानार्णवं तथा ।।**

**स्वायम्भुवं कापिलं च विहगेन्द्रं तथाऽपरम्।**
**आत्रेयं नारसिंहाख्यमानन्दाख्यं तथारुणम् ।।**

**बौधायनं तथा तन्त्रं तन्त्रं वैश्वावतारितम् ।**
**अष्टाक्षरविधानं तु महातन्त्रं तदुच्यते ।।**

**समासैर्विस्तरैरेते भूतलं व्याप्य संस्थिताः ।।** (२.१-७)

अत्र पञ्चविंशतिपञ्चरात्रागमनामावली पर्यवसानमेति। तदनु —

**तन्त्रं भागवतं चैव शिवोक्तं विष्णुभाषितम् ।**
**पद्मोद्भवं पुराणं च वाराहं च तथापरम् ।।**

**इमे भागवतानां तु तथा सामान्यसंहिता ।**
**व्यासोक्ता संहिता चान्या तथा परमसंहिता ।।** (२.८-९)

इत्येवमन्याः संहिताः परिगण्यन्ते । अत्र तन्त्रपदं संहितापदं च प्रयुज्यते, न क्वाप्यागमपदं प्रयुक्तमित्यवधेयम् । एतेन तन्त्रस्यास्य उत्तरभारतप्रभवत्वमपि सूच्यते । अग्निपुराणे च—

**प्रोक्तानि पञ्चरात्राणि...पञ्चविंशतिसंख्यया ।**
**हयशीर्षं तन्त्रमाद्यं तन्त्रं त्रैलोक्यमोहनम् ।।**

**वैभवं पौष्करं तन्त्रं प्राह्लादं गार्ग्यगालवम् ।**
**नारदीयं च सम्प्रश्नं शाण्डिल्यं वैश्वकं तथा ।।**

**सत्योक्तं शौनकं तन्त्रं वासिष्ठं ज्ञानसागरम् ।**
**स्वायम्भुवं कापिलं च तार्क्ष्यं नारायणीकम् ।।**

**आत्रेयं नारसिंहाख्यमानन्दाख्यं तथारुणम् ।**
**बौधायनं तथार्षं च विश्वोक्तं तस्य सारतः ।।** (३९.१-५)

इत्येवं पञ्चविंशतिपञ्चरात्रागमाः परिपठ्यन्ते।

अत्रेदमवधेयम्— अग्निपुराणे ३९-७० अध्यायेषु हयशीर्षपञ्चरात्रीयस्य आदिकाण्डस्य सर्वे विषया आनुपूर्व्या वर्ण्यन्त इति पञ्चरात्रागमानां नामावली

तदनुसारिणी स्यादिति समुचितमेव। सम्प्रश्नमित्यस्य स्थाने श्रीप्रश्नमित्येव समुचितः पाठः। गार्ग्यगालवमित्येकमेव तन्त्रम्। तथैव परिगणितमिदं डॉ. श्रादरमहोदयेनापि। उचितं च तत्, "समासैर्विस्तरैरेते भूतलं व्याप्य संस्थिताः" एतावत्पर्यन्तं हि पञ्चरात्रागमेन सम्बद्धो ग्रन्थः। पञ्चविंशतिसंख्याकानि पञ्चरात्राणीत्युभयत्र स्पष्टमेवोच्यते। तेन एतानि पञ्चविंशतितन्त्राण्येव परिगणितान्यग्निपुराण इति निश्चप्रचम्। डॉ. श्रादरमहोदयेनाग्निपुराणीयमार्षं तन्त्रमेवाष्टाक्षरविधाननाम्ना परिभाषितम्, अस्य नाम्नोऽग्निपुराणेऽदर्शनात्।

ततः परं भागवतानां तन्त्राणि हयशीर्षे परिगण्यन्ते, "इमे भागवतानां तु" (२.९) इति तत्र स्पष्टं निर्देशात्। अत्र डॉ. कालियामहोदयः [१]सप्त भागवततन्त्राणि परिगणयति—अष्टाक्षरविधान-तन्त्रभागवत-शिवोक्त-विष्णुभाषित-पद्मोद्भव-पुराण-वाराहाख्यानि। अत्राष्टाक्षरविधानं पूर्वोक्तयुक्त्या पाञ्चरात्रागमेष्वेव परिगणनीयम्। पुराणमिति नाम्नः परिगणनं डॉ. श्रादरमहोदयेनापि कृतम्। स्वतन्त्रमेतन्नाम, अथवा पद्मोद्भवस्य वाराहस्य च विशेषणतया योज्यमुत नामत्रयमेतत् संहितापदेन योजनीयमिति परीक्षणार्हमास्ते। नूतनः कश्चन [२]पुराणसंहितानामा ग्रन्थोऽवश्यमेव समुपलभ्यते। शर्वोक्तं तन्त्रमेव शिवोक्तपदेनात्राभिहितं स्यात्, एतन्नाम्नोऽन्यत्रापि दर्शनात्। तन्त्रभागवतं मध्वाचार्येण भागवततात्पर्यनिर्णये (पृ. २-३) स्मर्यते।

अत्रैवाग्रे परिपठिताः सामान्यसंहिता, व्यासोक्ता संहिता, परमसंहिता च डॉ. कालियामहोदयेन न परिगणिताः। एतासु परमसंहिता पञ्चरात्रागमे [३]पञ्चरत्नाख्यासु

---

१. "लक्ष्मीतन्त्र : धर्म और दर्शन" इत्याख्यो ग्रन्थो द्रष्टव्यः (पृ. १४)।

२. पुराणसंहितेयम् आलमन्दारसंहिता-बृहत्सदाशिवसंहिता-सनत्कुमारसंहितासंवलिता चौखम्बा-संस्कृत-ग्रन्थमालायां काशीतः २००८ वैक्रमे वत्सरे प्रकाशिता।

३. "तन्त्राणां चैव रत्नानि पञ्चाहुः परमर्षयः। पाद्मं सनत्कुमारं च तथा परमसंहिता॥ पद्मोद्भवं च माहेन्द्रं कण्वतन्त्रामृतानि च।" इति पाद्मसंहितायां चर्यापादे (३३. २०४-२०५) पञ्चरत्नसंहितानामानि परिपठ्यन्ते। अत्र "रत्नानि पञ्चाहुः" इति स्पष्टोक्तौ सत्यामपि षट् तन्त्राणि परिपठ्यन्त इति केचन कथयन्ति। समाधानमेतस्य बृहदितिहासे तन्त्रागमीये खण्डे संकलिते डॉ. कालियानिबद्धे "पांचरात्र परम्परा और साहित्य" इति शीर्षके निबन्धे द्रष्टव्यम् (पृ. ९९-१००)। शुक्लयजुर्वेदीयकाण्वशाखामनुसरत्सु पाञ्चरात्रतन्त्रेष्वमृतानि रत्नभूतानीमानि पञ्च तन्त्राणीति ग्रन्थार्थत्वात्, शुक्लयजुर्वेदीयकाण्वशाखया पञ्चरात्रतन्त्राणाम्, कृष्णयजुर्वेदीय-औखेयशाखया च वैखानसागमानां सम्बन्धस्य निर्विवादमङ्गीकृतत्वात्।

संहितासु परिपठ्यते, पाञ्चरात्राधिकरणे (२.२.४२) च रामानुजाचार्येण उद्ध्रियते। पञ्चरात्रपञ्चरत्नेष्वत्र पद्मोद्भवस्यापि नाम दृश्यते । सामान्यसंहिता का? व्यासोक्तायाः संहितायाश्च किं नामेत्येवमादिकाः प्रश्नाः साम्प्रतमपि स्वीयं समाधानमपेक्षन्ते। एवं चाष्टाक्षरविधानस्य पञ्चरात्रान्तर्गतत्वात् शिष्टाः षट्, तिस्रश्चेमा इति नवैताः, न तु दश, किं भागवतानां संहिता इति न निश्चयेन वक्तुं पार्येत, तथापि पञ्चरात्रागमेभ्यो भागवतागमानां भिन्नत्वसाधने गाढं बाढं समर्थमेतत् प्रकरणम् ।

अत्रैव संगृहीतैर्वैखानसागमोद्धृतवचनैर्भागवतागमा मिश्रविभागेऽन्तर्भाव्यन्ते। वैदिकस्तान्त्रिको मिश्र इति त्रिविधो मखो भगवतो विष्णोः श्रीमद्भागवत-देवीभागवतादिपुराणेष्वपि श्रूयते। विभागेऽस्मिन् वैदिकस्तान्त्रिकश्चेत्युभयविधः पूजाप्रकारः समन्वयमुखेन प्रवर्तते। विभागोऽयं स्मार्ततन्त्रनाम्ना साम्प्रतं परिचीयते। पुराणानि प्रायः स्मार्तपथमेवानुसरन्ति। एवं चाधुना तन्त्रभागवतादीनां ग्रन्थाना-मनुपलम्भात् पुराणादिसाहाय्येनैव तत्स्वरूपमुन्मील्येतेत्येव प्रशस्तः पन्थाः।

विष्णुपुराणम्, श्रीमद्भागवतमित्यादीनि पुराणानि भागवतसम्प्रदायस्यैव प्रातिनिध्यमाचरन्तीत्यामनन्ति मनीषिणः। नारदभक्तिसूत्रादयः, भगवद्भक्तिरसायन-भक्तिचन्द्रिका-हरिभक्तिरसायनसिन्धु-विष्णुभक्तिकल्पलताप्रभृतयो भक्तिशास्त्रग्रन्थाश्च भागवतसम्प्रदायमेवोपोद्बलयन्ति। रूपगोस्वामि-जीवगोस्वामिप्रभृतीनां वंगीयानां विदुषामुज्ज्वलनीलमणि-षट्सन्दर्भप्रभृतयो ग्रन्था विष्णुभक्तेर्गरीयस्त्वं रसरूपत्वं पञ्चमपुरुषार्थत्वं च साधयन्ति ।

एतेषां ग्रन्थानां ग्रन्थकाराणां वङ्गीयानां षड्गोस्वामिनामन्येषां च विदुषां तद्ग्रन्थानां च विस्तृतः परिचयो डॉ. जे. गोण्डारचिते ग्रन्थे प्रकामं द्रष्टुं शक्यते (पृ. १८-३२)। एवमेव प्रो. भागवतकुमारगोस्वामिना विरचितः [१]"भक्ति कल्ट इन एंश्येन्ट इण्डिया" इत्याख्यो ग्रन्थः प्रायश्चतुश्शतपृष्ठात्मकः प्रसङ्गेऽस्मिन् विशेषतोऽनुशीलनार्हः। अनेन हि विदुषा वेद-सांख्य-योग-जैन-बौद्ध-वेदान्त-पाशुपत-पाञ्चरात्र-इतिहास-पुराण-तन्त्र-भक्तिशास्त्रादिप्रामाण्येन निरर्थकाक्षेपनिरासपूर्वकं विशुद्धो भारतीयो भक्तिसिद्धान्तो व्याख्यातः।

## भक्तिसम्प्रदायः

भारते वर्षे भक्तिसम्प्रदायो भगवतः खीष्टस्य प्रादुर्भावात् परं प्रसृतिं लेभे —इत्याधुनिकाः पाश्चात्याः केचन विद्वांसो मन्यन्ते। प्रो. भागवतकुमारगोस्वामि-

---

१. ग्रन्थोऽयं कालिकातानगरीतः १९२२ ई. वर्षे प्रकाशित आसीत् ।

प्रभृतयस्तदनङ्गीकुर्वन्तो वेदेष्वपि तस्य बीजानि गवेषयन्ति। तन्मतानुसारं "एकं सद् विप्रा बहुधा वदन्ति" (ऋ. १.१६४.४६; अथर्व. ९.१०.२८) इतीदृशेषु वेदमन्त्रेषु सामान्येन, वरुणदेवतास्तुतिपरेषु सूक्तेषु च प्राधान्येन भक्तिभावभरिता सूक्तयः समुपलभ्यन्ते। "महाभाग्याद् देवताया एक एव आत्मा बहुधा स्तूयते। एकस्य आत्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति" (७.४.८-९) इति च निरुक्तकारो भगवान् यास्कः प्राह। "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्।।" (कठ. १.२.२३; मुण्डक. ३.२.३), "तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः" (कठ. १.२.२०; श्वेता. ३.२०; महाना. ८.१) इत्याद्याः श्रुतयो भगवतोऽनुग्रहस्य माहात्म्यं ख्यापयन्ति। "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।" (६.२३) इति च श्वेताश्वतरोपनिषदि सर्वप्रथमं भक्तिशब्दः प्रयुक्तो दृश्यते। वैष्णवा आचार्याः प्रायो भक्तेः प्रपत्तेश्च पर्यायतां वर्णयन्तस्तयोः स्वरूपं वैशद्येन वर्णयन्ति। तन्मतानुसारम्— "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।।" (६.१८) इत्यस्मिन् श्वेताश्वतरीये मन्त्रे प्रपत्तिसिद्धान्तः प्रतिपाद्यते। श्रीमद्भगवद्गीता च प्राधान्येन भक्तिप्रपत्तिसिद्धान्तस्य प्रतिपादिकेति जानीमो वयम्।

भारते भक्तिसम्प्रदायस्य स्वातन्त्र्येण प्रवृत्तिः ख्रीष्टसम्प्रदायस्य प्रादुर्भावात् पञ्चदशशतवर्षपूर्वं संजातेत्यैतिहासिकाः साधयन्ति। षडैश्वर्यसम्पन्नस्य भगवतो विष्णोः समुपासका भागवताः, त्रिशूलधारिणः शिवभागवताश्च शास्त्रेषु श्रूयन्ते। शिवभागवतशब्दो भगवता महाभाष्यकारेण पतञ्जलिना "अयःशूलदण्डाजिनाभ्यां ठक्ठञौ" (५.२.७६) इति पाणिनिसूत्रभाष्ये स्मर्यते। ततः पूर्वतनेष्वैतरेयारण्यकादिषु सात्वतधर्मानुयायिनश्चर्च्यन्ते। शतपथब्राह्मणे पाञ्चरात्रसत्रं वर्ण्यते। पाञ्चरात्रमत-प्राचीनतासाधकानि प्रमाणानीदृशानि तेषु तेषु ग्रन्थेषु द्रष्टुं शक्यन्ते। "सूरिः सुहृद् भागवतः सात्वतः पञ्चकालवित्। ऐकान्तिकस्तन्मयश्च पञ्चरात्रिक इत्यपि।। एवमादिभिराख्याभिराख्येयः कमलासन।" (४.२.८७-८८) इत्येवं पाद्मतन्त्रे सर्वाण्येतानि नामधेयानि पर्यायतया वर्ण्यन्ते। "आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्। रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा। आत्मनिक्षेपकारुण्ये षड्विधा

शरणागतिः॥'' (१७.६०-६१) इत्येवं च शरणागतिसिद्धान्तो लक्ष्मीतन्त्रे वर्ण्यते। षड्विधाया अस्याः शरणागतेर्विवरणं तत्रैव (१७.६६-८३) वैशद्येन द्रष्टव्यम्।

डॉ. जे. गोण्डामहोदयो भगवत्पदनिर्वचनं विधाय बृहद्ब्रह्मसंहितावर्णितान् वैष्णवः, एकान्ती, परमैकान्ती चेति त्रिधा भिन्नान् भागवतान् प्रदर्श्य क्रमशस्तेषां लक्षणानि वर्णयति (१.७.२६-५०), ततो नवविधां भक्तिं परिगणय्य नारायणीयोपाख्यानं श्रीमद्भगवद्गीतां श्रीमद्भागवतं च स्मरति। नारदविरचितं शाण्डिल्यरचितं च भक्तिसूत्रं श्रीमद्भागवतपुराणं सार्वात्म्येनानुसरतीति स वदति। भक्तिसम्प्रदायस्य प्राचीनताख्यापकान्यथर्ववेद-यजुर्वेद-सामविधानब्राह्मण-अथर्ववेदपरिशिष्टानि स समुद्धरति। छान्दोग्योपनिषत्सप्तमाध्यायप्रामाण्येन स सनत्कुमारं नारदं च, तथा छान्दोग्योपनिषत्प्रामाण्येनैव (३.१४), ''चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवान्'' (२.२.४५) इति शाङ्करभाष्यवचनेन च शाण्डिल्यम्, इत्येतान् भक्तिशास्त्रप्रवर्तकानाचार्यानङ्गीकरोति।

अत्र स नारदभक्तिसूत्रस्य, [१]शाण्डिल्यभक्तिसूत्रस्य, विष्णुपुरीकृतभक्तिरत्नावली-(भगवद्भक्तिरत्नावली)ग्रन्थस्य, मित्रमिश्रकृतभक्तिप्रकाशस्य, अनन्तदेवकृतभक्तिनिर्णयस्य (भगवद्भक्तिनिर्णयस्य), हरिभक्तिरसामृत-हरिभक्तिविलास-उज्ज्वलनीलमणि-बृहद्भागवतामृतप्रभृतिग्रन्थानाम्, रूप-सनातन-जीव-रघुनाथदास-गोपालभट्ट-रघुनाथ-भट्टाख्यानां षड्गोस्वामिनाम्[२], कृष्णदास-लीलाशुकप्रभृतीनां च वङ्गीयानां विदुषां विस्तरेणैतिहासिकं विवरणं प्रस्तौति (पृ. १५-३२)।

भक्ति-प्रपत्तिसिद्धान्तसूचकान्युपनिषद्वचांसि पूर्वमुद्धृतानि। ''सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः'' (७.२६.२) इत्येवं छान्दोग्योपनिषदि श्रुता ध्रुवा स्मृती रामानुजीये वेदान्ते भक्ति-प्रपत्तिसिद्धान्तमूलभूतेति वर्ण्यते। ''सा

---

१. सर्वेषामेषां ग्रन्थानां संस्करणानां तत्सम्बद्धानां निबन्धादीनां च परिचयस्तत्रत्यासु टिप्पणीषु द्रष्टव्यः।

२. षड्गोस्वामिनामेषां परिचय आचार्यबलदेव-उपाध्यायसंदृब्धे हिन्दीभाषामये ''भागवत सम्प्रदाय'' इत्याख्ये ग्रन्थेऽपि (पृ. ५०५-५१५) द्रष्टव्यः। ग्रन्थोऽयं काशीस्थया नागरीप्रचारिणीसभया २०१० वैक्रमे संवत्सरे प्रकाशितः। अत्र भक्तिसम्प्रदायस्य, विभिन्नानां प्राचीनानामर्वाचीनानां वैष्णवसम्प्रदायानां च स्वरूपं सम्यगुन्मीलितम्।

परानुरक्तिरीश्वरे'' (१.१.२) इत्येवं शाण्डिल्यभक्तिसूत्रे भक्तिलक्षणं वर्ण्यते। ईश्वरे परानुरक्तिरेव भक्तस्वान्ते ध्रुवां स्मृतिं जनयति। एवं च भक्तियोगस्य मौलिकाः सिद्धान्ताः प्राचीनासूपनिषत्सु प्रतिष्ठामापुरित्यत्र को नाम सचेता विवदेत।

उपनिषदामनु भक्तिसम्प्रदायस्य प्रारम्भिका उल्लेखा महाभारतस्य शान्तिपर्वणि नारायणीयोपाख्याने श्रीमद्भगवद्गीतायां च समुपलभ्यन्ते। नारायणीये (शान्ति. ३४९.६२), विष्णुधर्मोत्तरे (१.७४.३४) च सांख्य-योग-पाञ्चरात्र-पाशुपत-वेदारण्यकाख्यं कृतान्तपञ्चकं स्वयंप्रमाणतयाऽङ्गीकृतम्। भगवद्गीता पाञ्चरात्रमतमनुसरतीति प्रायः सर्वे स्वीकुर्वन्ति। पाशुपतमतं तत्र न चर्चितम्, किन्तु नारायणीये तत् स्मर्यते, महाभारतेऽनुशासनपर्वणि च तस्य सिद्धान्ता वैशद्येन विव्रियन्ते।

इमे पाञ्चरात्र-पाशुपतमते उभे भक्तिप्रधाने। एकत्र भगवतो विष्णोरपरत्र च भगवतः शिवस्य भक्तिः सविशेषं प्रतिपाद्यते। पतञ्जलिना महाभाष्ये (५.२.७६) शिवभागवताः शिवायुधं त्रिशूलं परिगृह्य भ्रमन्तश्चर्च्यन्त इत्यधुनैव प्रोक्तम्। शैवागमेषु— "भक्तिरेव परां काष्ठां प्राप्ता मोक्षोऽभिधीयते" (तन्त्रा. वि. १३. २१६) इति वर्ण्यते। श्रीमद्भागवते च—

**स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे।**
**अहैतुक्यप्रतिहता ययाऽऽत्मा सम्प्रसीदति** ।। (१.२.६),

**आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।**
**कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः** ।। (१.७.१०),

**मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम् ।**
**मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः** ।।(३.२५.२२),

**अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ।**
**जरयत्याशु या कोशं निगीर्णमनलो यथा** ।। (३.२५.३३),

**लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।**
**अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।।**

[1]सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।। (३.२९.१२-१३)

इत्येवं वारं वारमहैतुक्या अनिमित्ताया अव्यवहिताया भक्तेर्माहात्म्यातिशयो वर्ण्यते, यत्र हि भक्ताः सालोक्य-सार्ष्टि-सामीप्य-सारूप्यात्मिकां चतुर्विधां मुक्तिमेव न, भगवदैकात्म्यमपि नेच्छन्ति, यतो हि तत्र भगवत्सेवाया अवसरो नासाद्यते।

सा च भक्तिर्नवविधा भवतीति तत्रैवोपपाद्यते —

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।। (७.५.२३)

भागवतसंहितासु परिगणितायां परमसंहितायाम्—

अष्टाङ्गा भक्तिरुद्दिष्टा वैष्णवस्य विशेषतः ।।

देवस्याराधनं नित्यं समयस्य च रक्षणम् ।
वैष्णवस्य च विश्वासः पूजायामादरो महान् ।।

स्वयमाराधने यत्नस्तत्कथाश्रवणादरः ।
परबाधास्वनास्था च तत्पूजानुपजीवनम् ।।

इत्येषाऽष्टविधा भक्तिः (४.७२-७५)

इत्येवमष्टविधा भक्तिः प्रतिपादिता, "स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते" (४.७१) इत्येवं च तत्र भक्तेर्लक्षणं निरूप्यते।

तस्मात् सर्वप्रयत्नेन भक्तिमेव विवर्धयेत् ।
सा तु वृद्धा नयत्येव वैष्णवं परमं पदम् ।। (प. सं. ३.३५)

१. सालोक्य-सामीप्य-सारूप्य-सायुज्यशब्दाश्चतुर्विधमुक्तिस्वरूपनिरूपकाः प्रायः सर्वत्र पुराणादिषु पठ्यन्ते। अत्र सार्ष्टिशब्दोऽपि प्रयुक्तः। भागवतटीकाकाराः श्रीधरादयः सालोक्यं मया सहैकस्मिन् लोके वासम्, सार्ष्टिं समस्तैश्वर्यम्, सामीप्यं निकटवर्तित्वम्, सारूप्यं समानरूपताम्, एकत्वं सायुज्यमिति पञ्चविधां मुक्तिमत्र प्रदर्शयन्ति।

इत्यत्र च स्पष्टमेव "भक्तिरेव परां काष्ठां प्राप्ता मोक्षोऽभिधीयते" इति पूर्वोक्तं शैवागमीयं वचनं प्रतिध्वनितं भवति। भक्तेरस्या विवर्धनप्रकारस्तत्रैव (३०.३६-८१) विस्तरेण प्रोक्तः।

**न दानं न तपो नेज्या न शौचं न व्रतानि च ।**
**प्रीयतेऽनन्यया भक्त्या हरिरन्यद् विडम्बनम् ।।** (७.७.५२)

इति भागवतपद्यमप्यत्रानुगुणम् ।

कोऽयं भगवान्? इति प्रश्नस्य समाधानं च विष्णुपुराणे दृश्यते। तत्र हि भगवच्छब्दवाच्यस्य स्वरूपबोधकान् कांश्चन श्लोकान् परिपठ्य प्रोच्यते—

**तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ।**
**वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः ।।** (६.५.६९)

**शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते ।**
**मैत्रेय! भगवच्छब्दः सर्वकारणकारणे ।।** (६.५.७२) इति।

एवमेव तत्र—

**[१]ऐश्वर्यस्य समग्रस्य [२]धर्मस्य यशसः श्रियः ।**
**ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ।।** (६.५.७४)

---

१. शैवागमेषु— "सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥" (१२.३३) इति वायुपुराणदिशाऽन्यविधमेव षाड्गुण्यं माहेश्वरं वर्तते । भक्तिस्तोत्रकारोऽवधूतसिद्धोऽपि गायति— "ऐश्वर्यमप्रतिहतं सहजो विरागस्तृप्तिर्निसर्गजनिता वशितेन्द्रियेषु । आत्यन्तिकं सुखमनावरणा च शक्तिर्ज्ञानं च सर्वविषयं भगवंस्तवैव ॥" (श्लो. ३६) इति । सर्वज्ञतादयो माहेश्वराः षड्गुणा इमे प्रायः सर्वेष्वेव शैवागमेषु शैवपुराणेषु च वर्ण्यन्ते । "भेदः सर्वज्ञतादीनां ज्ञानादीनां च नास्त्यमी । ज्ञानस्यैव धर्मतया चिद्रूपस्य स्थितिर्यतः॥ (पृ. १०३.) इति वदन् स्पन्दप्रदीपिकाकार उत्पलवैष्णवः कक्ष्यास्तोत्र-षाड्गुण्यविवेकादिप्रामाण्येन शैवीयं वैष्णवीयं च षाड्गुण्यं समन्वयमुखेन व्याकरोति (पृ. १०३-१०४) ।

२. 'धर्मस्य' स्थाने 'वीर्यस्य' इति पाञ्चरात्रागमसम्मतः पाठः ।

इत्येवं भगपदार्थं व्यावर्ण्य—

**एवमेष महान् शब्दो मैत्रेय भगवानिति ।**
**परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ।।** (६.५.७६)

इत्येवं प्रकरणोपसंहारमुखेन पुनरपि [१]भगवत्पदं वासुदेवपदं च तत्र निरुच्यते ।

सोऽयं भगवान् भक्तपराधीन इति भागवते भण्यते—

**अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।**
**साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ।।**

**नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ।**
**श्रियं चात्यन्तिकीं ब्रह्मन् येषां गतिरहं परा ।।**

**ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम् ।**
**हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ।।**(९.४.६३-६५)

परमसंहितायां च स भक्तमुपदिशति —

**येषु भावेषु मे क्रीडा सर्गे संहार एव च ।**
**तान् भावानानुपूर्व्येण भक्तियुक्तः सदा स्मर ।।** (२.३) इति ।

तेन किं भविष्यतीत्यस्य प्रश्नस्योत्तरं च श्रीमद्भगवद्गीतायामेवं प्रदीयते—

**समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।**
**ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।।**

---

१. "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।।" (६.५.७८) इति च निरुक्तिस्तत्रैव प्रदर्श्यते । "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि" (६.५.७९) इत्येवं च षण्णां गुणानामपि भगवच्छब्दवाच्यत्वं तत्रैव निरूप्यते । षण्णां गुणानां समष्ट्या व्यूहवासुदेवस्य, यथायथं शान्तेषु चतुर्षु गुणेषु प्रबुद्धयोश्च द्वयोर्द्वयोर्गुणयोः क्रमशः सङ्कर्षण-प्रद्युम्न-अनिरुद्धाख्यानां व्यूहानामित्येवं व्यूहचतुष्टयस्य प्रादुर्भावो भवति । सोऽयं विषयः पाञ्चरात्रागमेषु वैशद्येन प्रतिपाद्यते । अस्माभिश्च सात्वतसंहिताया उपोद्घाते (पृ. १९-२९) नानाग्रन्थप्रामाण्येन विवेचितः।

**अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।**

**साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ।।**(९.२९-३०)

भक्तिशास्त्रपरिचयप्रसङ्गे महामहोपाध्याय-भारतरत्नादिविविधविरुदालङ्कृतेन श्रीमता [1]पी. वी. काणेमहोदयेन विष्णुभक्तिप्रतिपादका एव ग्रन्था उल्लिखिताः। परमिदमत्रावधातव्यं यद् दक्षिणे भारते विष्णुभक्तानामालवाराणामिव शैवभक्तानां महती परम्परा प्रादुर्भूता । पुष्पदन्तस्य महिम्नस्तवः, अवधूतसिद्धस्य भक्तिस्तोत्रम्, भट्टनारायणस्य स्तवचिन्तामणिः, उत्पलभट्टस्य शिवस्तोत्रावलिः, जगद्धरस्य स्तुतिकुसुमाञ्जलिः— इत्येतादृशाः शिवभक्तिप्रवणाः शतशो ग्रन्थाश्च सम्पूर्णेऽपि भारते समुपलभ्यन्ते। डॉ. जे. गोण्डामहोदयोऽत्र सावहितो वर्तते। तेन पूर्वोक्तविष्णुभक्तिसमर्पितग्रन्थग्रन्थकारेभ्योऽतिरिक्तमुपर्युद्धतानां काश्मीराभिजनानां शिवभक्तानां ग्रन्थाः परिचायिता एव, तत्रत्याया भक्तकवयित्र्या लल्लाया लल्लावाक्यानीति ग्रन्थस्य, वेदान्तदेशिक-अप्पयदीक्षितप्रभृतीनां दाक्षिणात्यानां च विदुषां भक्तिभावभरितानां भक्तवैभवप्रकाशिका-आर्याशतकादीनां ग्रन्थानाम्, अथ च महीधरभट्टकृतव्याख्यासहितस्य पुरुषोत्तमकृतविष्णुभक्तिकल्पलताख्यग्रन्थस्यापि परिचयः सम्यगुपन्यस्तः (पृ. ३२-३८)।

शाण्डिल्यभक्तिसूत्रे निर्दिष्टा— "सा परानुरक्तिरीश्वरे" (१.१.२) इति भक्तेः परिभाषा पूर्वमेवास्माभिः स्मारिता। विष्णुपुराणे भक्तप्रवरः प्रह्लादोऽपि—

**या प्रीतिरविवेकानां विषयेष्वनपायिनी ।**

**त्वामनुस्मरतः सा मे हृदयान्माऽपसर्पतु ।।** (१.२.१९)

इत्येवं भगवन्तं प्रार्थयन् तामेव परिभाषां स्मारयति। अत्र भक्तिपदस्य स्थाने प्रीतिशब्दः प्रयुक्तो दृश्यते। अस्मिन्नेवार्थे भगवद्गीतायामपि प्रीतिपदं प्रयुक्तम्। तद्यथा—

**तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।**

**ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।** (१०.१०) इति।

---

१. द्रष्टव्यम्— धर्मशास्त्र का इतिहास, हिन्दी संस्करणम्, चतुर्थो भागः, पृ. ४५९-४६०; हिन्दी समिति, लखनऊ, सन् १९७३।

विष्णुपुराणेऽनुरागपदमप्यस्मिन्नेवार्थे प्रयुज्यते— "येऽपि तेषु भगवतदंशेष्वनुरागिणः कोसलनगरजानपदास्तेऽपि तन्मनसस्तत्सालोक्यमवापुः" (४.४.१०३) इति।

कर्म-ज्ञानयोरपेक्षया भक्तेर्गरीयस्त्वख्यापनं प्रायः सर्वेष्वेव तन्त्रागमपुराणेषु दरीदृश्यते। विष्णुपुराणस्य वचनमिदमत्र प्रसङ्गेऽवश्यमेवावधानार्हम्—

**धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता।**
**समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ।।** (१.२०.२७) इति।

वैष्णवेषु शैवेषु चागमेषु [1]शक्तिपातस्य ईश्वरभक्तिप्रयोजकत्वं भगवदनुग्रहापादकत्वं च प्रतिपाद्यते। श्रीमद्भागवतमहापुराणे प्रसङ्गेऽस्मिन् पोषणशब्दः प्रयुक्तः— "पोषणं तदनुग्रहः" (२.१०.४) इति। शुद्धाद्वैतवादप्रवर्तकस्य श्रीमतो वल्लभाचार्यस्य सिद्धान्तः पुष्टिमार्गपदेन परिचीयते। भगवतः प्रसादो दया अनुग्रह एवात्र पुष्टिपदेन परिगृह्यते। एवं च शक्तिपातसिद्धान्त एवात्र नूतनया पद्धत्या प्रस्थापित इति वक्तुं शक्यते।

सर्वसमर्थं भगवन्तं सर्वातिशायिनं प्रति शरणमापन्नो भक्तः प्रपन्न इत्यभिधीयते। आत्मनिक्षेप आत्मसमर्पणमेव शरणागतिपदाभिलप्यं भवति। भक्तस्यान्तिमं लक्ष्यं प्रपत्तिरेव, शरणागतिरेव भवति। भक्तो भक्तिसाहाय्येन स्वेष्टदेवं शरणं गतः सर्वतोभावेन स्वात्मानं निवेदयति। यदुक्तं गीतायाम् —

**कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ।**
**यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ।।** (२.७)

अत्र भगवन्तं शरणं गतोऽर्जुनः किंकर्तव्यविमूढः श्रेयोमार्गजिज्ञासां प्रकटयति, भगवांश्च— "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज" (१८.६६) इति प्रत्युत्तरयति। "तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" (६.१८) इति श्वेताश्वतरश्रुतिरप्यर्जुनप्रश्नमेव समादधाति।

---

१. लुप्तागमसंग्रहस्य द्वितीयभागस्य उपोद्घाते (पृ. १५५-१५८) मूले टिप्पण्यां च कर्मसाम्यादिस्वरूपप्रदर्शनपुरस्सरं शक्तिपातो विशेषेण विवेचित इति तत एव द्रष्टव्यम्।

रामानुजीया वैष्णवा भक्तितत्त्वतः प्रपत्तिसिद्धान्तस्य भिन्नतां ख्यापयन्ति। यतीन्द्रमतदीपिकाकारो हि श्रीनिवासदासो ध्यानशब्दवाच्यां भक्तिं बहुविधामुपवर्ण्य प्रपत्तेः स्वरूपमेवं प्रतिपादयति— "न्यासविद्या प्रपत्तिः। प्रपत्तिर्नाम —

**आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।**
**रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ।।**
**आत्मनिक्षेपकार्पण्यम् ...... ।**

इत्याद्यङ्गपञ्चकयुक्ता[१] एतद्देहावसाने मोक्षप्रदा सकृत्कर्तव्या न्यासः शरणागतिरित्यादिशब्दवेद्या ज्ञानविशेषरूपा" (पृ. ६४) इति । उपासनाशब्दो भक्तेः पर्यायतयाऽत्र स्वीक्रियते। उपासना हि प्रपत्तौ सहायिका भवति। एवं च भक्तिपूर्विका उपासनाप्रवृद्धा प्रपत्तिरेव तत्र मोक्षसाधनत्वेन समुपवर्ण्यते (तत्रैव, पृ. ६५)।

यतीन्द्रमतदीपिकाकारः कर्मयोग-ज्ञानयोग-भक्तियोगानां लक्षणानि भेदांश्चोपवर्ण्य केवलं भक्तिप्रपत्त्योरेव पूर्वोक्तपद्धत्या मोक्षसाधनत्वं स्थापयति। काणेमहोदयेन तु भक्तिमार्ग-ज्ञानमार्गयोरुभयोरपि मोक्षसाधनत्वं निरणायि। दृष्टिभेदोऽत्र कारणम्। ज्ञानमार्गेऽव्यक्तोपासनायां निर्गुणस्य ब्रह्मणो ज्ञानमात्रेण शास्त्रीयेण मोक्षाधिगतिर्नैव भवति, तदर्थं तु [२]ब्राह्मी स्थितिरपेक्षिता । ज्ञानमार्गे ज्ञानी ब्रह्मार्पणमुखेन (गी. ४.१८-२४) प्रवर्तते। एतद्विपरीतं भक्त ईश्वरप्रसादाय स्वात्मानं निवेदयति। स कर्तव्यमकर्तव्यं च सर्वम् "तेनैव देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि" इति दिशा ईश्वरप्रसादमुखेन[३] स्वीकुरुते। भगवद्गीतायामपि द्वादशेऽध्याये भक्तिमार्गापेक्षया ज्ञानमार्गस्याधिकतरक्लेशसाध्यत्वं संवर्ण्यते। पुराणादिषु च ज्ञानमार्गापेक्षया भक्तिमार्गानुष्ठाने सारल्यं प्रदर्श्यते। प्रसङ्गेऽस्मिन् गीताया द्वौ श्लोकौ विशेषेणावधानमर्हतः—

---

१. पूर्वोद्धृते लक्ष्मीतन्त्रवचने— "आत्मनिक्षेपकारुण्ये षड्विधा शरणागतिः" (१७.६१) इत्येवं शरणागतेः षाड्विध्यं वर्ण्यते । तदेव नः समुचितं प्रतिभाति ।

२. ब्राह्मी स्थितिरियं श्रीमद्भगवद्गीतायां स्थितप्रज्ञप्रकरणे वैशद्येन वर्णिता द्रष्टव्या (२.५४-७२)।

३. वीरशैवागमेषु स्वीकृतेष्वष्टावरणेषु प्रसादाख्यस्यावरणस्याप्येवमेव व्याख्यानं दृश्यते । "अष्टावरण-विज्ञान" (पृ. ७५-७८) इति, "सिद्धान्तशिखामणिसमीक्षा" (पृ. ३२२-३२३) इति च ग्रन्थो द्रष्टव्यः ।

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।।**

**ये त्वन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः ।**
**तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ।।** (९.२२-२३) इति।

अत्र श्रुतिवचनमिदं प्रतिध्वनितमिव भवति—

**इन्द्रं मित्रं वरुणमग्निमाहु-**
**रथो दिव्यः स सुपर्णो गरुत्मान् ।**
**एकं सद् विप्रा बहुधा वदन्ति**
**अग्निं यमं मातरिश्वानमाहुः ।।**
(ऋ.१.१६४.४६) इति ।

एवं विवेचितोऽत्र यथामति भागवतसिद्धान्तानुगुणो भक्तिप्रपत्तिसिद्धान्तः। नवविधाया भक्तेः पुनरुत्तम-मध्यम-अधमविभागेन [1]त्रैविध्यम्, साधन-भाव-प्रेमभक्तिरूपेण [2]तस्यास्त्रैविध्यम्, भक्तेः [3]पञ्चमपुरुषार्थत्वम्, नवविधरसेभ्यो

---

१. भक्तिचन्द्रिका-मुक्ताफल-भक्तिमीमांसादिषु प्रतिपादिता भक्तिभेदाः शाण्डिल्यभक्तिसूत्रस्य व्याख्याया भक्तिचन्द्रिकाया नारायणतीर्थविरचिताया वाराणसीतः सरस्वतीभवनग्रन्थमालायां नवमपुष्पत्वेन प्रकाशिते द्वितीये संस्करणे १९६७ ई. वर्षीये विविधेषु स्थलेषु तालिकामुखेन प्रदर्शिता द्रष्टव्याः। संस्करणेऽस्मिन् स्वप्नेश्वरभाष्यसहितानि शाण्डिल्यभक्तिसूत्राणि, मूलमात्राणि शाण्डिल्यभक्तिसूत्राणि, भक्तितत्त्वविवरणम्, त्रिविधभक्तिविवरणं पद्मपुराणीयम्, त्रिविधभक्तिविवरणं स्कन्दपुराणीयम्, नारदभक्तिसूत्राणि, भक्तिमीमांसापरभक्तिसूत्राणि— इत्येते ग्रन्था अपि समाविष्टा द्रष्टव्याः ।

२. "सा भक्तिः साधनं भावः प्रेमा चेति त्रिधोदिता" (१.२.१) इत्येवमादिना ग्रन्थेन त्रिविधेयं भक्तिः सभेदोपभेदा हरिभक्तिरसामृतसिन्धौ श्रीरूपगोस्वामिविरचिते द्रष्टव्या । अच्युतग्रन्थमालायां काशीतः १९८८ वैक्रमे वत्सरे गोस्वामिदामोदरशास्त्रिणा सम्पाद्य प्रकाशितोऽयं ग्रन्थः।

३. भक्तेः स्वतन्त्रपुरुषार्थत्वं भक्तिचन्द्रिकायां (पृ. २११-२१२) संक्षेपेण विवेचितं द्रष्टव्यम् ।

भिन्नोऽयं दशमो [१]भक्तिरसः—इत्यादयो विषयास्तेषु तेषु भागवतादिपुराणेषु भक्तिशास्त्रप्रबन्धेषु च विस्तरेण विवेचिता इति नात्र चर्च्यन्ते ।

काश्मीरकेण वामनदत्तेन प्रत्यभिज्ञाशास्त्रमनुसरता संवित्प्रकाशाख्ये स्वकीये ग्रन्थे बहुषु काश्मीरशैवशास्त्रग्रन्थेष्वपि समुद्धृते साम्प्रतं [२]प्रकाशपदवीमानीते—

**यत्रेन्धनं द्वैतवनं मृत्युरेव महापशुः ।**
**अलौकिकेन यज्ञेन तेन नित्यं यजामहे ।।**

इत्येवं वैष्णवागमा अप्यद्वैतदृष्ट्या व्याख्याता इत्यन्या कथा। शैव्या भक्तेरद्वैतपरता किल भट्टोत्पलविरचितायाः शिवस्तोत्रावल्याः शिवानन्देन मुनिना नित्याषोडशिकार्णवव्याख्यायामृजुविमर्शिन्यां समुद्धृते वचने द्रष्टव्या —

**निजनिजेषु पदेषु पतन्त्विमाः करणवृत्तय उल्लसिता मम ।**
**क्षणमपीश मनागपि मैव भूत् त्वदविभेदरसक्षतिसाहसम् ।।** (८.५)

अस्य श्लोकस्यायमभिप्रायः— रहस्यगुरोः शिवस्तोत्रावलीकारस्य भट्टोत्पलस्य भगवदविभेदरसक्षतिः क्षणमपि मनागपि नाभिमता। उपासकेन भगवती त्रिपुरसुन्दरी चक्रे बहिस्थे पूजामण्डले भेदेन इदन्तयोल्लास्य क्षणमुपास्यते। एष प्रमाद एव क्षाम्यतेऽत्रेति ।

**अपरोक्षे भवत्तत्त्वे सर्वतः प्रकटे स्थिते ।**
**यैरुपायाः प्रतन्यन्ते नूनं त्वां न विदन्ति ते।।**

**एतावतैव भेदोऽस्य यदहम्मानिताऽऽत्मनि ।**
**सा चेद्विलीना त्वद्भक्त्या नष्टो भेदः स्थितैकता।।**

इतीदृशानि संवित्प्रकाशवचनान्यप्यत्रैवानुगुणानि । एवं सत्यपि—

**सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।**
**सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ।।**

इति भगवत्पादशङ्कराचार्योक्तिरेव भक्तिसिद्धान्तानुगुणेति सर्वमनवद्यम् ।

●

---

१. भक्ते रसरूपत्वं रूपगोस्वामिविरचिते हरिभक्तिरसामृतसिन्धौ श्रीमता गोस्वामिदामोदरशास्त्रिणा संदृब्धे तत्रत्ये सम्पादकीये वक्तव्ये च विवेचितं द्रष्टव्यम् ।

# उपसंहारः

एवमत्रास्माभिस्त्रिभेदभिन्नानां वैष्णवागमानां संक्षिप्तः परिचयः समुपस्थापितः। उपासनाविधौ कर्म-योग-ज्ञानानामपेक्षया भक्तेर्गरीयस्त्वख्यापनं नामास्य शास्त्रस्य विशिष्टः सिद्धान्तः। सोऽयं विषयोऽपि भक्तिप्रपत्तिमुखेनात्र विवेचितः। निवृत्तिलक्षणः प्रवृत्तिलक्षणश्च धर्मो भवति। तत्र सात्वतो हि क्रियामार्गः प्रवृत्तिलक्षणः। "प्रवृत्तिलक्षणश्चैष धर्मो नारायणात्मकः" (३४७.८३) इत्येवं हि महाभारते नारायणीयोपाख्याने प्रतिपाद्यते। क्रियामार्गोऽयं ज्ञानस्य भक्तेश्च साहाय्येन प्रपत्तौ परिणमते, भोगमोक्षयोश्च सम्पादको भवतीति हि एकान्तिनो भागवता मन्यन्ते। भगवद्गीतायां भागवतादिपुराणेषु सात्वतादिसंहितासु च तस्य माहात्म्यातिशयो वर्ण्यते।

"तान् सात्वते क्रियामार्गे मद्वाक्याद् याहि योजय" (१.७) इति सात्वतवचनस्याद्यावधि निवृत्तिपरायणान् मुनीन् सात्वतशास्त्रोदिते शुद्धे क्रियामार्गे प्रवृत्तिलक्षणे योजयेत्यभिप्रायो ज्ञेयः। क्रियामार्गोऽयं क्रियायोगपदेन पातञ्जलयोगसूत्रे व्याख्यातः— "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" (२.१) इति। अयम्— "समाधिभावनार्थः क्लेशतनूकरणार्थश्च" (२.२) भवति। सात्वतप्रदर्शितोऽन्तर्यागः समाधिभावनयैव निष्पाद्यत इति किल विभावनीयम्।

श्रीमद्भागवतेऽपि— "तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः" (१.३.८) इत्यत्र नारदावतारप्रसङ्गे सात्वततन्त्रं स्मर्यते। प्रायः सर्वे टीकाकाराः सात्वततन्त्रं पाञ्चरात्रशास्त्रमिति व्याकुर्वते। सात्वततन्त्रापराभिधा सात्वतसंहिता नारदेनैव ऋषिभ्य उपदिष्टेति तस्या एवात्र परिग्रहो युक्तः। "क्रियायोगाः सर्वे संसृतिहेतवः" इति भावार्थदीपिकाकारवंशीधरोद्धृतवचनानुसारं सर्वे क्रियायोगाः संसृतिहेतवो भवन्ति, किन्तु भागवतीयमिदं वचनं कर्मणामपि मोक्षप्रदत्वप्रतिपादकम्। तथा हि श्रीधरः— "कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः" इत्येवं वचनमेतद् व्याकरोति। "कर्मणां मोक्षसाधनत्वम्" इति पदरत्नावलीकारो विजयध्वजः। "भगवत्सेवापरत्वेन मोचकत्वमेव भवति" इति च गिरिधरो

बालप्रबोधिनीकारः। "तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते" (५.२) इत्येवं भागवती गीताऽपि कर्मयोगस्य माहात्म्यं निर्दिशति। एवं च वैष्णवागमेषु सर्वेषु भगवद्गीतायां भागवतमहापुराणे च कर्मणामपि मोचकत्वमङ्गीक्रियते।

अमूर्तं समूर्तम्, निर्गुणं सगुणम्, निष्कलं सकलं च ब्रह्म सर्वेष्वागमेषु समाराध्यते । पाञ्चरात्रागमेषु तदेतद् दशाद्वयरूपेण व्याक्रियते। तत्र सततोदितया नित्योदितापरनामधेयया दशया युक्तः परवासुदेव इति, शान्तोदितया च दशया युक्तो व्यूहवासुदेव इत्युच्यते । परवासुदेवे षाड्गुण्यं स्तिमितं व्यूहवासुदेवे च प्रबुद्धमवतिष्ठते । शान्तोदितो व्यूहवासुदेवः षाड्गुण्यमहिम्ना यथायथं शान्तेषु चतुर्षु गुणेषु प्रबुद्धयोश्च द्वयोर्द्वयोर्गुणयोः साहाय्येन क्रमशः सङ्कर्षण-प्रद्युम्न-अनिरुद्धाख्यानि त्रीणि रूपाणि धत्ते। एवं च परब्रह्मणश्चातुरात्म्यं निष्पन्नं भवति । ब्रह्मणो दशाद्वयमेतत् सात्वतभाष्यकारेण (पृ. १८-१९) मतभेदपुरस्सरं व्याख्यातम्। वस्तुतस्तु परवासुदेवो नित्योदितः (सततोदितः), व्यूहवासुदेवश्च शान्तोदित इत्येव समुचितः पन्थाः। एवमेवोपबृंहितमहिर्बुध्न्यसंहितायां पञ्चमाध्याये, लक्ष्मीतन्त्रेऽपि च द्वितीयदशमयोः। अस्यां स्थितौ विष्वक्सेनसंहितानुसारं परवासुदेवस्यैवैतद् दशाद्वयमिति भाष्यकारव्याख्यानं सुखाववबोधफलकमवसेयम् । अत एव भोजदेवेन— "नित्यः सततोदितः प्रभुः शान्तः" (श्लो. १) इत्यत्र परमशिवः सततोदितपदेनैव स्तूयते । एवं च अमूर्तसमूर्त-निर्गुणसगुण-निष्कल-सकलादयः शब्दास्तासु तास्वागमभाषासु ब्रह्मणो दशाद्वयद्योतकाः स्वीकर्तव्याः।

भगवान् परवासुदेव एव स्वेच्छया स्वचैतन्यं नामरूपादिशबलितं कृत्वा तद्रूपेण विवर्तते (१७.३८), [१]सम्भूति (सृष्टि)-स्थिति-संहार-भोग-कैवल्यलक्षणं पञ्चारमिदं चक्रं विशाखयूपो भगवान् स्वधिया प्रेरयति (९.५७), तस्य

---

१. सम्भूति-स्थिति-संहार-भोग-कैवल्यलक्षणं पञ्चारमिदं संसारचक्रं सात्वतायां (९.५७) प्रतिपाद्यते । शैवशाक्ततन्त्रेषु वर्णितेन सृष्टि-स्थिति-संहार-निग्रह-अनुग्रहाख्येन कृत्यपञ्चकेन चैतत् तुलयितुं शक्यते। प्रवृत्तिमार्गोपदेशकेषु वैष्णवागमेषु हि कर्मणामपि भोगमोक्षप्रदत्वं निर्दिष्टमिति भोगमोक्षपदाभ्यामेवावशिष्टं कृत्यद्वयं बोध्यते । ऐहिकाः पारलौकिकाश्च भोगा अपि भगवत्स्वरूपा एवेति तेषां निरोधकत्वं तिरोधायकत्वं वा नाङ्गीक्रियते । निग्रहानुग्रहौ शाङ्करवेदान्तसंमताभ्यामध्यारोपापवादाभ्यां तुलयितुं शक्येते । नहि वैष्णवागमेषु शाङ्करमतप्रभाव इति सर्वत्र सद्ब्रह्मावलोकयतां मतेऽस्मिन् कृत्यद्वयमेतद् भोगकैवल्यलक्षणमुपदिश्यते । शाक्ते च क्रमदर्शने तदेतदनाख्याभासापदाभ्यां निर्दिष्टम् ।

[1]शक्तिद्वयम् (१३.४९), अचला सात्वती भक्तिरत्र जन्मबीजक्षयङ्करी (१.५-६) इत्येवं सात्वतायां संक्षेपेण सृष्टिसंहारादीनां भागमोक्षयोस्तदधिगमोपायस्य च स्वरूपं प्रदर्श्यते। अयमेव न्यायः सर्वेष्वागमदर्शनेषु योजनीयः। [2]विवर्तपदमत्र नाद्वैतवेदान्त-सम्मतेऽर्थे प्रयुज्यते, अपि तु "विवर्ततेऽर्थभावेन" (१.१) इति वाक्यपदीयपद्ये भर्तृहरिणोऽभिप्रेतमर्थमभिव्यनक्ति। तेन विवर्तत इत्यस्य परिणमत इत्येवार्थो मन्तव्यः।

विशाखयूपो हि भगवान् स्वयं विश्वसिसृक्षया आद्यपदस्थस्य चातुरात्म्यस्य तुर्यव्यूहस्य [3]शुद्धसंवित्पुरस्सरं महिमानमादाय व्यूहविभवावतारसाधनोपकरणं सर्वं संगृह्य वासुदेवाद्यं मूर्तिशाखाचतुष्टयं विहाय तथैव वैभवीयस्य यूथस्य पतित्वेनावतिष्ठते, यथा किल अर्ककिरणव्रातं त्यक्त्वा महान् तेजःकणः स्वकारणं विना सर्वं गोचरमापूरयति। भगवतो विशाखयूपादेव पद्मनाभादीनामष्ट-त्रिंशद्विभवदेवानामाविर्भावो जायते (९. ४९-५७) इत्येवं विशाखयूपादेव सर्वं प्रवर्तत इति सात्वतायामुच्यते। एवं च शैवागमेषु यथा शिवो बिन्दूपादानां

---

१. भोक्तृशक्तिः कर्तृशक्तिश्चेति शक्तिद्वयमेवाहिर्बुध्न्यसंहितायां भूतिशक्तिः क्रियाशक्तिरिति च नाम्ना निर्दिष्टम्। तत्र क्रियाशक्तिः शुद्धसृष्टिम्, भूतिशक्तिश्च शुद्धेतरसृष्टिं जनयति। शैवागमेषु शुद्धसृष्टेर्बिन्दूपादानत्वम्, अशुद्धसृष्टेश्च मायोपादानत्वं प्रतिपाद्यते। शुद्धसृष्टेः शिवः, अशुद्धसृष्टेश्चानन्तः प्रयोजयिता। नात्र शैवशाक्तागमवच्छक्तित्रयं स्वीक्रियत इति वैशिष्ट्यं वैष्णवागमानाम्। लक्ष्मीतन्त्रे तु शक्तित्रयमप्यङ्गीकृतम्। तत्र हि शैवशाक्तागमानां स्पष्टः प्रभावः परिलक्ष्यते।

२. विवर्त-परिणामपदयोर्विशिष्टं विवरणं लुप्ता. उपो. (पृ. १२४-१२५, टि. ५) द्रष्टव्यम्। अत्र संवित्प्रकाशोऽद्वैतप्रवणान् वैष्णवागमान् परमार्थसारसदृशान् ग्रन्थांश्चानुसरतीति विज्ञेयम्।

३. "शान्तः संवित्स्वरूपस्तु" (२.६९), "संविदुत्पद्यते परा" (३.४७), "स्वसंविद्गगने" (१०.५६) इत्यादिषु स्थलेषु च सात्वतायां प्रयुक्तोऽयं संविच्छब्दश्चित्पर्यायोऽभिप्रेतव्यः। महेश्वरानन्दो हि संविदेव भगवती विषयोपगमे नः शरणमिति गुरुमतमर्यादां मानयन् (महार्थमञ्जरीपरिमले, वाराणसीसंस्करणे, पृ. ७७) संविदो ज्ञानपर्यायत्वं स्वीकरोति। इयांस्तु विशेषः— शाक्ततान्त्रिकैर्न केवलं प्रभाकरवज्ज्ञानपर्यायत्वेन, अपि तु परब्रह्मपर्यायत्वेनापि सा व्याख्यायते। अत एव— "संविदेव भगवती स्वान्तःस्थितं जगद् बहिः प्रकाशयतीति दर्शनरहस्यम्" (ऋजु., पृ. २७) इत्येवं नित्याषोडशिकार्णव-व्याख्याता शिवानन्दः संविदः परतत्त्वस्वरूपत्वं ख्यापयति।

शुद्धसृष्टिम्, अनन्तश्च मायोपादानामशुद्धसृष्टिं प्रवर्तयति, तथैवात्र वासुदेवः क्रियाशक्तिमादाय शुद्धसृष्टिम्, विशाखयूपो भगवांश्च भूतिशक्तिसाहाय्येनाशुद्धसृष्टिं निष्पादयतीति वक्तुं शक्यते । अयमेव न्यायो वैखानसे भागवते चागमेऽनुसर्तुं शक्यते ।

वैष्णवागमेषु कोऽधिकृत इति विषयोऽपि विशेषेणावधेयोऽस्ति । वैखानसागमेऽष्टादशसंस्काराणामङ्गीकृतत्वात् तत्र चोपनयनसंस्कारस्यान्तर्भूतत्वात्, तत्र च त्रैवर्णिकानामेवाधिकारस्य स्वीकाराच्चात्र त्रैवर्णिका एवाधिकृता इति वक्तुं शक्यते । पाञ्चरात्रागमे तु— "ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा भगवन्मयः। नित्याराधनकामस्तु यदि मन्त्रमयं वपुः।। कर्तुमिच्छति लक्ष्यार्थं तत्र किं लक्षणो विधिः।" (२४.२-३) इतीदृशं सात्वतायां सङ्कर्षणप्रश्नमुत्तरयता भगवता चित्रमृत्काष्ठशिलालोहमयत्वेन पञ्चविधानामपि बिम्बानां प्रत्येकं ब्राह्मणादिक्रमेण चातुर्विध्यम्, चित्रमयं पुनः भित्तिकाष्ठाम्बराश्रितत्वेन त्रिविधम्, अम्बराश्रितं च वर्णक्रमेणैव कार्पासकौशेयक्षौमशाणभेदेन चतुर्विधमिति प्रतिपादयता शूद्रोऽप्यत्र प्रतिमापीठप्रासादनिर्माणेऽधिकृत इति सूच्यते । तत्रैव प्रतिष्ठाविधिप्रदर्शके परिच्छेदे— "स्थलं विना न चैवार्च्याः" (२५.३१२-३१६) इत्यादिषु श्लोकेषु तु द्विजातीनामेवार्चाधिकारो निरूपितः। न तत्र दृश्यते कापि चर्चा स्त्रीशूद्रयोः। तत्रैव (१९.५३-५६) अमद्यपान्वयोत्थस्य लोकधर्मोज्झितस्य आप्तवद् ब्रह्मनिष्ठस्य कर्मतन्त्ररतस्य शूद्रजातेर्गोदानं विहितम्, तदाहृतं पुष्पमाल्यादिकं च कर्मार्हमभिमतम्, किन्तु तस्य वषट्काराद्यनर्हत्वान्मन्त्रशरीरे तत्प्रतिनिधित्वेन नमस्कारो योज्य इत्युच्यते। तद्भाष्यकारेण च पाद्मसंहितावचनानि समुद्धरता— "शूद्रादीनां प्रणवनमस्कारावपि निषिद्धौ । अन्यत्र—" न स्वरः प्रणवोऽङ्गानि नाप्यन्यविधयः स्मृताः। स्त्रीणां च शूद्रजातीनां मन्त्रमात्रोक्तिरिष्यते ।।" इति प्रणवमात्रं निषिद्धम्" (पृ. ३८८) इत्युच्यते । शैवागमेष्वपि षडक्षरमन्त्रप्रसङ्गे एषैव दृष्टिः प्रमुखा भवति, स्त्रीशूद्रादीनामाराधनाय च पञ्चाक्षरमन्त्रो विधीयते। एवं च तदेतेषु वैष्णवेषु शैवेषु चागमेषु वर्णाश्रमाचाराणां न कोऽपि विरोधो दरीदृश्यते। "स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्" इति भगवद्गीतावचनमनुसरद्भिरेभिः स्त्रीशूद्रादयोऽपि दीक्षाधिकारिणोऽभिमता इत्येव श्रौतवाङ्मयापेक्षया तदेतेषां किञ्चिद् वैशिष्ट्यम्। एवं सत्यप्यत्र प्रतिपादितेषु कर्मसु न मानवमात्रस्य समानोऽधिकारोऽभिप्रेत इति पूर्वोक्तैरुद्धरणैः स्फुटीभवति ।

"यथोक्तं कालपादादौ दीक्षयेच्छ्वपनादपि" (मालिनीवार्त्तिके, पृ. २०), "द्विजोऽपि मायी त्याज्यस्तु म्लेच्छो ग्राह्यो ह्यमायकः" (लुप्ता. द्वि., पृ. १४१), "पुनाति भगवद्भक्तश्चण्डालोऽपि यदृच्छया" (गरुड. १.२१९.१०), "घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी। कुलं जातिश्च शीलं च अष्टौ पाशाः प्रकीर्तिताः॥" (कुलार्णवे, १३.९०) इत्यादीनि प्रत्यभिज्ञाशास्त्र-पुराण-तन्त्रवचनानि च मानवमात्रं दीक्षाधिकारिणं मन्वते। सोऽयं विषयोऽस्माभिर्लुप्ता. उपो. (पृ. २०३-२१७) वैशद्येन वर्णितः। भारतीयायाः सांस्कृतिकसमस्यायाः समाधानमत्रैव पिहितमित्येवोक्त्वा साम्प्रतं विरम्यते ॥

•

# परिशिष्टानि

जितन्तेस्तोत्रम्

जितन्तेस्तोत्र-श्लोकार्धानुक्रमणी

विशिष्टपदसूची

सहायकग्रन्थसूची

# जितन्तेस्तोत्रम्

## अथ प्रथमोऽध्यायः

ब्रह्मोवाच

जितं ते पुण्डरीकाक्ष पूर्णषाड्गुण्यविग्रह ।
परानन्द परब्रह्म नमस्ते चतुरात्मने ॥१॥

नमस्ते पीतवसन नमः कटकधारिणे[1] ।
नमो नीलालकाबद्धवेणीसुन्दरविग्रह[2] ॥२॥

स्फुरद्वलयकेयूरनूपुराङ्गदभूषणैः ।
शोभनैर्भूषिताकार कल्याणगुणराशये ॥३॥

करुणापूर्णहृदय शङ्खचक्रगदाधर ।
[3]परमानन्दपूर्णाभ्यां लोचनाभ्यां विलोकय ॥४॥

कृशं कृतघ्नं दुष्कर्मकारिणं पापभाजनम् ।
अपराधसहस्राणामाकरं करुणाकर ॥५॥

कृपया मां केवलया गृहाण म[4]थुराधिप ।
विषयार्णवमग्नं मामुद्धर्तुं त्वमिहार्हसि ॥६॥

पिता माता सुहृद् बन्धुर्भ्राता पुत्रस्त्वमेव हि[5] ।
विद्या धनं च [6]कामश्च नान्यत् किञ्चित् त्वया विना ॥७॥

यत्र कुत्र कुले वासो येषु केषु भवोऽस्तु मे ।
तव [7]दास्यैकभा[8]वः स्यात् सदा सर्वत्र मे रतिः[9] ॥८॥

---

१. हारिणे– क. ख.। २. पुङ्गव– क. ख.। ३. अमृता– क. घ.। ४. मधुरा– घ.। ५. मे– क. ख.। ६. कामं च– घ.। ७. दासै– क. ख.। ८. भोगे– घ.। ९. मतिः– घ.।

मनसा कर्मणा वाचा शिरसा वा कथञ्चन ।
त्वां विना नान्यमुद्दिश्य करिष्ये किञ्चिदप्यहम् ।।९।।

पाहि पाहि जगन्नाथ कृपया भक्तवत्सल ।
अनाथोऽहमधन्योऽहमकृतार्थः कथञ्चन ।।१०।।

नृशंसः पापकृत् क्रूरो वञ्चको निष्ठुरः सदा ।
भवार्णवे[१] निमग्नं मामनन्यं करुणा[२]निधे ।।११।।

करुणापूर्णदृष्टिभ्यां दीनं मामवलोकय ।
त्वदग्रे पतितं त्यक्तुं तावकं नार्हसि प्रभो ।।१२।।

मया कृतानि पापानि त्रिविधानि पुनः पुनः ।
त्वत्पादपङ्कजं प्राप्तुं नान्यत् त्वत्करुणां विना ।।१३।।

साधनानि प्रसिद्धानि यागादीन्यब्जलोचन ।
त्वदाज्ञया प्र[४]वृत्तानि त्वामुद्दिश्य कृतानि वै ।।१४।।

भक्त्यैकलभ्यः पुरुषोत्तमोऽ[५]सौ
जगत्प्रसूतिस्थितिनाशहेतुः ।
अकिञ्च[६]नोऽनन्यगतिं शरण्यं
गृहाण मां क्लेशिनमम्बुजाक्ष ।।१५।।

धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन ।
त्वत्पादपङ्क[७]जस्याधो जीवितं मम दीयताम् ।।१६।।

कामये तावकत्वेन परिचर्या[८]नुवर्तनम् ।
नित्[९]यं किङ्करभावेन परिगृहणीष्व मां विभो ।।१७।।

---

१. वनि– घ.। २. णोदधे– क. ख.। ३. विवि– घ.। ४. प्रयुक्तानि– घ.। ५. त्तमो हि– क. ख.। ६. ञ्चनो… गतिः… रण्यः– क. ख.। ७. जास्वादजी– घ.। ८. र्यासु व– क. ख.। ९. नित्यकि– घ.।

लोकं वैकुण्ठनामानं दिव्यं षाड्गुण्यसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥१८॥

नित्यसिद्धैः[1] समाकीर्णं त्वन्मयैः पाञ्चकालिकैः ।
सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभैः ॥१९॥

वापीकूपतटाकैश्च वृक्षखण्डैः[2] सुमण्डितम् ।
अप्राकृतं[3] सुरैर्वन्द्यमयुतार्कसमप्रभम् ॥२०॥

प्रकृष्टसत्त्वराशिं त्वां कदा द्रक्ष्यामि चक्षुषा ।
क्रीडन्तं रमया सार्धं लीलाभूमिषु केशवम् ॥२१॥

मेघश्यामं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ।
उन्नासं चारुदशनं बिम्बौष्ठं शोभनाननम्[4] ॥२२॥

विशालवक्षसं श्रीशं कम्बुग्रीवं जगद्गुरुम् ।
आजानुबाहुपरिघमुन्नतांसं मधुद्विषम्[5] ॥२३॥

तनूदरं[6] निम्ननाभिमापीनजघनं हरिम् ।
करभोरुं श्रियःकान्तं कदा द्रक्ष्यामि चक्षुषा ॥२४॥

शङ्खचक्रगदापद्मैरङ्कितं पादपङ्कजम् ।
शरच्चन्द्रशताक्रान्तनखराजिविराजितम् ॥२५॥

सुरासुरैर्वन्द्यमानमृषिभिर्वन्दितं सदा ।
कदा[7] वा देव मूर्धानं मामकं मण्डयिष्यति ॥२६॥

कदा गम्भीरया वाचा श्रिया युक्तो जगत्पतिः[8] ।
चामरव्यग्रहस्तं मामेवं कुर्विति वक्ष्यति ॥२७॥

---

१. नित्यं– घ.। २. खण्डैश्च म– क. ख.। ३. कृतसु– ख.। ४. च शुभाननम्– क., शोभिता– घ.। ५. शुभाननम्– क.। ६. विशालनिम्ननाभि तमा– घ.। ७. मूर्धानं मामकं देव तावकं मण्डयिष्यति– क. ख.। ८. त्पते– क.।

कदाऽहं राजराजेन गणनाथेन [1]नोदितः ।
चरेयं भगवत्पादपरि[2]चर्यासु वर्तनम् ।।२८

शान्ताय सुविशुद्धाय तेजसे परमात्मने ।
नमः सर्वगुणातीत षड्गुणायादिवेधसे ।।२९।।

सत्यज्ञानानन्तगुणब्रह्मणे चतुरात्मने ।
नमो भगवते विष्णो वासुदेवा[3]य वेधसे ।।३०।।

चतुःपञ्चनवव्यूह दशद्वादशमूर्तये ।
[4]नमोऽनन्ताय विश्वाय विश्वातीताय चक्रिणे ।।३१।।

नमस्ते पञ्चकालज्ञ पञ्चकालपरायण ।
पञ्चकालैकमनसां त्वमेव गतिरव्ययः ।।३२।।

[5]स्वमहिम्नि स्थितं देवं निरधिष्ठं निरञ्जनम् ।
[6]अप्रमेयमजं विष्णुं शरणं त्वां गतोऽस्म्यहम् ।।३३।।

वागतीतं परं शान्तं[7] कञ्जनाभं सुरेश्वरम् ।
[8]तुरीयाद्यतिरिक्तं त्वां कौस्तुभोद्भासिवक्षसम् ।
विश्वरूपं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ।।३४।।

[9]मोक्षं सालोक्यसारूप्यं प्रार्थये न [10]धराधर ।
[11]इच्छाम्यहं महाभाग[12] कारुण्यं तव सुव्रत ।।३५।।

सकलावरणातीत किङ्करोऽस्मि तवानघ ।
पुनः पुनः किङ्करोऽस्मि तवाहं पुरुषोत्तम ।।३६।।

---

१. चो– ख. घ.। २. नुवृत्तिषु– क. घ., सुवृत्तिषु– ख.। ३. मितद्युते– ख. घ.। ४. नमस्ते वासुदेवाय ब्रह्मणे चतुरात्मने– घ.। ५. स्वे– क., परे व्योम्नि– घ.। ६. अब्जनाभं सुरेश्वरम्– घ.। ७. न्तमब्ज– क. ख.। ८. तुर्यद्वन्द्वातिरिक्तं– घ.। ९. मोक्ष....रूप्यान्– ख.। १०. कदाचन– घ., 'धर' इत्यतो ग.पुस्तकारम्भः। ११. मि हि– क. ख. ग.। १२. बाहो सायुज्यं– घ.।

आसनाद्यनुयागान्तमर्चनं यन्मया कृतम् ।
भोगहीनं क्रियाहीनं मन्त्रहीनमभक्तिकम् ।
तत्सर्वं क्षम्यतां देव दीनं मामात्मसात् कुरु ।।३७।।

इति स्तोत्रेण देवेशं स्तुत्वा मधुनिघातिनम् ।
यागावसानसमये देवदेवस्य चक्रिणः ।
नित्यं किङ्करभावेन स्वात्मानं विनिवेदयेत् ।।३८।।

इति श्रीपञ्चरात्रागमे जितन्तेस्तोत्रे[1] ब्रह्मनारदसंवादे[2] प्रथमोऽध्यायः[3] ।।

●

१. 'जितन्तेस्तोत्रे' नास्ति– घ.। २. 'ब्रह्मनारदसंवादे' नास्ति– क. ग.। ३. इति द्वितीयजितन्ता– घ.।

## अथ द्वितीयोऽध्यायः

[1]ब्रह्मोवाच

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥१॥

विज्ञापनमिदं देव [2]शृणुष्व पुरुषोत्तम ।
नरनारायणाभ्यां च श्वेतद्वीपनिवासिभिः ॥२॥

नारदाद्यैर्मुनिगणैः सनकाद्यैश्च योगिभिः ।
ब्रह्मेशाद्यैः सुरगणैः पञ्चकालपरायणैः ।
पूज्यते(से) पुण्डरीकाक्ष दिव्यैर्मन्त्रैर्म[3]हर्षिभिः ॥३॥

पाषण्डधर्मसंकीर्णे भगवद्भक्तिवर्जिते ।
कलौ जातोऽस्मि देवेश सर्वधर्मबहिष्कृते ॥४॥

कथं त्वामसमाचारः पापप्रसवभूरुहः[4] ।
अर्चयामि दयासिन्धो पाहि मां शरणागतम् ॥५॥

तापत्रयदवाग्नौ [5]च दह्यमानं सदा विभो ।
पाहि मां पुण्डरीकाक्ष केवलं कृपया तव ॥६॥

जन्ममृत्युजराव्याधिदुःखसन्तप्तदेहिनम् ।
पालयाशु दृशा देव तव कारुण्यगर्भया ॥७॥

इन्द्रियाणि मया जेतुमशक्यं पुरुषोत्तम ।
शरीरं मम देवेश व्याधिभिः परिपीडितम् ॥८॥

---

१. 'ब्रह्मोवाच' नास्ति- ख. ग.। २. शृणु त्वं- घ.। ३. महात्मभिः- क.। ४. भूरहम्- ख. ग. घ.। ५. मां- क. घ.।

मनो मे पुण्डरीकाक्ष विषयानेव धावति ।
वाणी मम हृषीकेश मिथ्यापारुष्यदूषिता ।।९।।

एवं साधनहीनोऽहं किं करिष्यामि केशव ।
रक्ष मां कृपया कृष्ण [१]भवाब्धौ पतितं सदा।।१०।।

अपराधशतं[२] चैव सहस्रमयुतं तथा ।
अर्बुदं चाप्यसंख्येयं करुणाब्धे क्षमस्व मे।।११।।

यं[३] चापराधं कृतवानज्ञानात् पुरुषोत्तम ।
[४]भक्तस्य मम देवेश तत्सर्वं क्षन्तुमर्हसि।।१२।।

अज्ञत्वादल्पशक्तित्वादालस्याद् दुष्टभावनात् ।
कृतापराधं कृपणं क्षन्तुमर्हसि मां विभो ।।१३।।

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व [५]मधुसूदन ।।१४।।

यज्जन्मनः प्रभृति मोहवशं गतेन
नानापराधशतमाचरितं मया ते ।
अन्तर्बहिश्च सकलं तव पश्यतो[६] हि
क्षन्तुं त्वमर्हसि हरे करुणावशेन ।।१५।।

कर्मणा मनसा वाचा या चेष्टा मम नित्यशः।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि ।।१६।।

।।इति पञ्चरात्रागमे जितन्तेस्तोत्रे [७]ब्रह्मनारदसंवादे [८]द्वितीयोऽध्यायः।।

●

---

१. भवाग्नौ- क. ख.। २. सहस्राणां- क. ख. ग.। ३. यच्चाप- ख. ग.। ४. अज्ञस्य- ग., मद्भक्त इति- घ.। ५. पुरुषोत्तम- क.। ६. तोऽपि- ख. ग., तो मे- घ.। ७. 'ब्रह्मनारदसंवादे' नास्ति- क. ग. घ.। ८. इति तृतीयजितन्ता- घ.।

## अथ तृतीयोऽध्यायः

[1]ब्रह्मोवाच

जितं ते पुण्डरीकाक्ष [2]नमस्ते विश्वभावन ।
[3]नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ।।१।।

नमस्ते वासुदेवाय शान्तानन्दचिदात्मने ।
अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते ।।२।।

अच्युतायाविकाराय तेजसांनिधये नमः ।
क्लेशकर्माद्यसंस्पृष्ट पूर्णषाड्गुण्यमूर्तये ।।३।।

त्रिभिर्ज्ञानबलैश्वर्यवीर्य[4]शक्त्योजसां युगैः ।
त्रिगुणाय[5] नमस्तेऽस्तु नमस्ते चतुरात्मने ।।४।।

[6]चतुःपञ्चनवव्यूह दशद्वादशमूर्तये ।
प्रधानपुरुषेशाय नमस्ते [7]पुरुषोत्तम ।।५।।

अनेकमूर्तये तुभ्यममूर्तायैकमूर्तये ।
नारायण नमस्तेऽस्तु पुण्डरीकायतेक्षण ।।६।।

सुभ्रूललाट [8]सुमुख सुस्मिताधरपल्लव[9] ।
पीनवृत्तायतभुज श्रीवत्सकृतभूषण[10] ।
तनुमध्य विशालाक्ष[11] पद्मनाभ नमोऽस्तु ते ।।७।।

विलासि विक्रमाक्रान्तत्रैलोक्यचरणाम्बुज ।
नमस्ते पीतवसन स्फुरन्मकरकुण्डल ।।८।।

---

१. 'ब्रह्मोवाच' नास्ति– ख.ग.घ.। २. महापुरुष पूर्वज। परानन्द परब्रह्म नमस्ते चतुरात्मने– ग.। ३ पङ्क्तिरियं नास्ति– घ.। ४. शक्त्यन्तरात्मने– घ.। ५. युगाय– घ.। ६. पङ्क्त्योर्विपर्यस्तः क्रमः– ख.ग.। ७. चतुरात्मने– क.। ८. सुनस– ख.ग.। ९. विद्रुम– क.ख.। १०. लक्षण– घ.। ११. महावक्ष– क.ग.।

स्फुरत्किरीटकेयूर [१]हारकौस्तुभभूषण ।
पञ्चायुध नमस्तेऽस्तु नमस्ते [२]पाञ्चकालिक ।
पञ्चकालरतानां[३] त्वं योगक्षेमं वह प्रभो ॥९॥

नित्यज्ञानबलैश्वर्य भोगोपकरणाच्युत ।
नमस्ते ब्रह्मरुद्रादिलोकयात्राप्रवर्तक[४] ॥१०॥

जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तनयोऽस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ॥११॥

अपि त्वां भगवन् ब्रह्मा [५]शर्वः शक्रो महर्षयः ।
द्रष्टुं यष्टु[६]मभिष्टोतुमद्यापीश नहीशते[७] ॥१२॥

तापत्रयमहाग्राहभीषणे भवसागरे ।
मज्जतां नाथ नौरेषा प्रणति[८]स्त्वत्पदार्पिता ॥१३॥

अनाथाय जगन्नाथ शरण्य शरणार्थिने ।
प्रसीद सीदते मह्यं [९]नमस्ते भक्तवत्सल ॥१४॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम्[१०] ।
तत् क्षन्तव्यं प्रपन्नानामपराधसहो ह्यसि[११] ॥१५॥

सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किङ्करोऽस्मि हृषीकेश भूयो भूयोऽस्मि किङ्करः ॥१६॥

[१२]एकत्रिचतुरत्यन्तचेष्टायेष्टाकृते[१३] सदा[१४] ।
व्यक्तषाड्गुण्यतत्त्वाय[१५] चतुरात्मात्मने नमः ॥१७॥

---

१. नूपुराङ्गद- क.। २. पञ्च- क.। ३. पते कान्त- ख. ग., परैकान्ति- घ.। ४. परिच्छद- घ.। ५. शर्वशक्रम- क.। ६. मपि स्तोतुं नहि स्मर्तुमपीशते- घ.। ७. शिरे- ग.। ८. तिस्तु त्वदर्पिता- क. ख. ग.। ९. मुह्यते- क. ख. ग.। १०. र्चनम्- क. घ.। ११. इत: परम्- "अज्ञानादथवा ज्ञानादशुभं यत्कृतं मया । क्षन्तव्यं तदशेषेण दास्येन च गृहाण माम्॥" इत्यधिक: श्लोक:- घ.। १२. अत्रत्यौ द्वौ श्लोकौ न स्त:- घ.। १३. येष्टकृते- क., ज्येष्ठाकृतिस्थिते- ग.। १४. स्वयम्- ख.। १५. चेष्टाय- ख. ग.।

[१]कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि ।।१८।।

।।इति पञ्चरात्रागमे[२] [३]जितन्तेस्तोत्रे ब्रह्मनारदसंवादे [४]तृतीयोऽध्यायः।।

---

१. श्लोकोऽयं नास्ति– ख. ग.। २. रात्रे– क.। ३. "जित संवादे" नास्ति– क.। ४. इति चतुर्थजितन्ता– घ.।

## अथ चतुर्थोऽध्यायः

[१]ब्रह्मोवाच

जितं ते पुण्डरीकाक्ष [२]नमस्ते विश्वभावन।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ।।१।।

देवानां दानवानां च सामान्यमधिदैवतम् ।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ।।२।।

[३]एकस्त्वमसि[४] लोकस्य स्रष्टा संहारकस्तथा।
अध्यक्षश्चानुमन्ता च [५]गुणमायासमावृतः ।।३।।

संसारसागरं घोरमनन्तं क्लेशभाजनम्।
त्वामेव शरणं प्राप्य निस्तरन्ति [६]मनीषिणः ।।४।।

न ते रूपं न चाकारो नायुधानि न चास्पदम्।
तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे ।।५।।

नैव किञ्चित् परोक्षं ते प्रत्यक्षोऽसि न कस्यचित्।
नैव किञ्चिदसाध्यं[७] ते न च सिद्धोऽसि [८]कस्यचित्।।६।।

कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ।
योगिनां[९] परमां सिद्धिं परमं ते पदं विदुः ।।७।।

अहं भीतोऽस्मि देवेश संसारेऽस्मिन् भयावहे।
पाहि मां पुण्डरीकाक्ष न जाने शरणं परम्।।८।।

---

१. नास्ति- ख. ग.। २ पूर्णषाड्गुण्यविग्रह- ग.। ३. पिता त्व- क.। ४. मस्य- ग.। ५. गुणद्वन्द्वं समाव्रज- ख.। ६. मनस्विनः- क. ख.। ७. दसिद्धं- क. ख. घ.। ८. कर्हिचित्- ग.। ९. योगानां- क. घ.।

कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ।
शरीरे च गतौ चास्य वर्तते हि[1] महद्भयम् ।।९।।

त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ।
निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ।।१०।।

विज्ञानं यदिदं प्राप्तं यदिदं [2]ज्ञानमूर्जितम् ।
जन्मान्तरेऽपि मे[3] देव मा भूत् तस्य परिक्षयः ।।११।।

दुर्गतावपि जातायां त्वद्गतो मे मनोरथः ।
यदि नाशं न विन्देत तावताऽस्मि कृती सदा ।।१२।।

न कामकलुषं [4]चित्तं मम ते पादयोः स्थितम् ।
कामये वैष्णवत्वं च[5] सर्वजन्मसु केवलम् ।।१३।।

[6]अज्ञानादथवा[7] ज्ञानादशुभं [8]यत्कृतं मया ।
क्षन्तुमर्हसि देवेश दास्येन च गृहाण माम् ।।१४।।

सर्वेषु देशकालेषु सर्वावस्थासु [9]चाच्युत ।
